अभिनवरत्नमाला

पुण्यपत्तनस्थ—

'न्यू इंग्लिश् स्कूल्' संज्ञकपाठशालानियुक्तेन

प्रधानसंस्कृताध्यापकेन

ओकोपन म्ना पाण्डुरङ्गसूनुना महादेवेन

विरचिता

सा च

पुण्यपत्तने

जगद्धितेच्छुसंज्ञकमुद्रणयन्त्रालये मुद्रिता

खिस्ताब्दाः १९२०

मूल्यं रूपकमात्रम्

Printed at "Jagaddhitechhu Press", 507 Shanwar Peth, Poona
by K. R. Gondhalekar
AND
Published by S. G. Phadake, Proprietor,
G. Ramchander & Co., Budhwar Peth, Poona City.

अभिनवरत्नमाला

अनुक्रमणिका

Opinion.

OF

Prof V. K. Rajwade M. A.

I have been charmed with the Sanskrit passages read out to me by Mr. M. P. Oka, Sanskrit teacher, New English School, Poona. By long practice he has now achieved a style that is altogether free from all taint of artificialness and modernity. His Sanskrit is simple, idiomatic and quite within the comprehension of High School students who find even Kalidas too hard. Simple Sanskrit—both prose nad verse—placing before students matter to be found in English Readers has long been a desideratumn. Mr. Oka's book will supply the demand aud reconcile boys and girls to Sanskrit, which upto now has repelled them. The book affords agreeable reading matter even to advanced students and grown up men. I am sure Government and the public will patronise it.

Introduction

BY

Prof. R. Sadasiv Aiyar.

It is a fact only too well-known to students of Sanskrit literature, that there are in it no short lyrics and odes (like those of Palgrave's 'Golden Treasury') on familiar every-day objects, odes redolent with the breath of romance and instinct with the soul of poetic inspiration. Nor are there many prose-musings and *obiter dicta* in Sanskrit forming complete passages by themselves, for the profit of juvenile minds and the relaxation of scholars in their less strenuous moods. To a zealous lover of Sanskrit, any book like this of my friend Mr. Oka's, which attempts new veins of thought and new vehicles of expression in fresh imagery will be a most welcome departure from the beaten track of trite letters. A literature whose modes of expression tend to become rigid and conventional, which has ceased long to respond to evolving national ideals, ideas and feelings, which does not continue to mirror the protean genius of ever-changing conplex national life through new art-forms, cannot but invite the contemptuous apellation of being a dead language There could then be no nobler task for a teacher of Sanskrit than endeavouring to enrich and diversify the content and modes of composition in the language dear to him. It is this feeling which makes me regard the writings of Mr. Oka, so refreshing in their modernity and originality, as assets in the education of Indian boys; they solve one of

the difficulties in the way of nationalizing foreign culture.

Through the following pages, the boys imbibe the best of East and West, of old and new, from the poetry of objects so near to them that their slumbrous eyes wake on them every morning. With exquisite grace of spontaneous invention, Mr. Oka conjures up the spirit of dead, inanimate things—dead only to the dull soul—endows them with a human voice; and makes them deliver messages of love, hope and joy to man. The pen, the hearth, the broomstick, the cake on the oven open their souls like prophets declaring to us the meaning and purpose of life; and they come to us with the delightful reminiscence of the talking Oak the brook, and the cloud with which we have loved to converse in the pages of Tennyson or Shelley. In Mr. Oka's short, swallow flights of song that dip their wings in fancy and skim away, the inner mystery of objects becomes articulate, and speaks to our inmost heart.

Unmistakable indeed is the moral significance of these poems. Here are lines for young Indian citizen which utter a gospel beyond caste and creed–the supreme gospel of humanity and national service; but the poems are not on that score heavily didactic, written to the parson's order, and extracting the unwilling l' *envoi*. Their lesson seems to emanate out of them like the aroma of the rose. Throughout this volume the reader will find no single line which sounds a note of scholastic artificiality, no word-torture and metrical jugglery, no hackneyed hymn to mythological gods and goddesses, no distant shadow of theological suggestion. The thoughts are positive,

energizing, humanistic; and they are refracted through varied imagery, edged with lambent humour. Perhaps there are few pieces through which a sense of quiet playful humour does not diffuse itself like a luminous mist.

Their style too is a remarkable feature of these poems and prose-passages. Easier than the easiest passages of the ancient classical dramatists, their dictien is limpid, chaste idiomatic and straightforward. The verses sing themselves much like the immortal melodies of Jayadeva's Gita Govind while there runs through the sinewy, direct and elegant prose, a subtle rhythm calculated to rouse young enthusiasm for literature.

Those pieces which are avowedly translations are intended to transfuse and re-present in oriental garb, thoughts and ideals which are precious gifts to us from the west. How eminently the Sanskrit language lends itself to the expreesion of the thoughts of western poets can be seen from Mr. Oka's renderings of poems like Southey's 'Scholar' and Wordsworth's 'We are Seven.' They have as it were taken a second birth in the imagination of the translator, and seem to well up with all the ardour of original, indigenous inspiration; verily, they taste n t like Western but like Eastern wine in Eastern bottles. In this matter they are, however modest, a distinct advance npon, and contribution to existing Sanskrit literature, a landmark and an index of the new spirit abroad of making literature intercontinental in subject matter aud idea!s.

Mr. Oka proposes to offer to the public in a series of booklets choice extracts from the Sanskrit writings

of the past 50 years, from writings inspired by our contact with Western culture, but ringing true as well, with a genuine oriental individuality. The historic importance of such passages is too obvious to be missed by enlightened readers; aud hence I hope they will receive a cordial welcome and support at the hands of those who are interested in Sanskrit studies, and in fostering them among the young.

अभिनवरत्नमाला

वरयाचना

शङ्करं प्रति

हिमगिरौ धवले वसतिस्तव
धवल एव वृषस्तव वाहनम् ।
वहसि भूतिचितं धवलं वपुः
शिरसि गाङ्गजलं धवलं तथा ॥ १ ॥

वसति पिङ्गजटानिवहे तव
शशिकला धवलामृतवर्षिणी ।
त्वदधरे हसितं सितमित्यहो
सदृशसंघटना हृदयङ्गमा ॥ २ ॥

धवलिमा विपुलस्तव संनिधौ
तमिममात्मपदाम्बुजसेविनः ।
वितर चेतसि कर्मणि मे विभो
विविदिषोर्भुवने धवलं यशः ॥ ३ ॥

बिभ्रत् त्रितापशमनाय करे त्रिशूलं
नेत्रत्रयं त्रिजगतस्तिमिरापनुत्यै ।
त्रिस्रोतसं त्रिमलसंहरणाय शम्भो
देहि त्रिवर्गफलसाधनपाटवं मे ॥ ४ ॥

चुल्लीप्रशंसा

अम्ब चुल्लि गुणगौरवं तव
शंसितुं न मम वाक् पटीयसी ।
दुर्गमेऽपि विषये यथामति
यत्न एष तु मया प्रतायते ॥ १ ॥

मृद्भुवोऽपि महिमा तवाद्भुतो
दृश्यते स्फुटतया गृहे गृहे
यद्वदन्त्यभिजनोऽत्र कारणं
गौरवे जनिभृतां न तत्तथा ॥ २ ॥

उत्थिता उषसि तूर्णमङ्गना—
स्तावकीनचरणावुपासते
कोमलेन च करेण सादरं
मार्जनं विदधते तनोस्तव ॥ ३ ॥

त्वं किल प्रणयभाजनं परं
रक्ष्यसे सुबहुयत्नमास्थितैः ।
गण्यसे परममङ्गलस्य च
धाम सर्वमनुजैः स्ववेश्मनि ॥ ४ ॥

देवतामिव गृहे प्रतिष्ठितां
त्वां भजन्ति मनुजा न केवलम् ।
खानिलानलजलान्यपि स्वयं
पार्थिवीं तनुमुपाश्रयन्तिं ते ॥ ५ ॥

त्वं करोषि किल काष्ठभक्षणं
क्षुव्यथा प्रशमनार्थमात्मनः ।
पोषणाय मनुजन्मनां पुनः
षड्रसं प्रदिशसीह भोजनम् ॥ ६ ॥

स्वोदरं प्रखरपावकेण च
दह्यमानमनुमन्यसेऽनिशम् ।
अन्यदीयजठरानलं परं
भोजनैः शमयसेऽमृतोपमैः ॥ ७ ॥

कार्श्यमेत्य तनुघर्षणात्सदा
हन्त हर्षयसि मानवान्मुदा ।
संशितं व्रतमिदं निषेवसे
प्रेप्सितं च फलमस्य विन्दसे ॥ ८ ॥

त्वं सकृद्धि किल कालयोगतः
स्वाङ्गभङ्गमुपयासि चेत्तदा ।
नो जनिर्भवति ते पुनर्भुवि
लीयसे प्रकृतिरूप एव च ॥ ९ ॥

ईदृशीं स्वभवने निवेशयं—
स्त्वां नरो भवति संसृतौ रतः ।
श्रेयसे न घटते मनागपि
हा विचित्रमिदमेव भाति मे ॥ १० ॥

सकललोकहितान्न हि भिद्यते
स्वहितमित्यनयैव धिया सुधीः ।
त्वमिव धीरतया सहतां सदा
विविधदुःसहदुःखपरम्पराम् ॥ ११ ॥

शुकबालकसंवादः

—:०:—

बालकः—

चल चल शुक चल चटुलगते
वसतिर्विपिनेऽनुचिता ते ॥ १ ॥

एहि मया सह मद्भवनं
विजहाहीदं विजनवनम् ॥ २ ॥

सत्वरमवतर तरुशिखरात्
संविश सुखशयनेऽप्यचिरात् ॥ ३ ॥

काष्ठमयं त्यज विटपमिमं
रुचिरपञ्जरं भज हैमम् ॥ ४ ॥

नित्यं नवकुसुमस्तबकं
तवोपनेष्याम्येकैकम् ॥ ५ ॥

परिणतसुमधुरफलनिकरं
वितरेयं क्षुच्छान्तिकरम् ॥ ६ ॥

शुकः—

अयि वटो पटुमते किमिति विमनायसे
वहसि किं मम कृते व्यर्थचिन्ताम् ।
वाचमायासन् किं फलं लिप्ससे
श्रोतुमिच्छामि यन्नाहमेताम् ॥ १ ॥

याहि शीघ्रं यथायातमार्गेण भो
भवतु भूत्यै तवैवात्मभवनम् ।
तृणमयं नीडमिदमेव मम तुष्टये
नान्यदस्तीह मे सौख्यसदनम् ॥ २ ॥

कन्दफलमूलजलबहुलमेतद्वनं
क्षुत्तृषाप्रशमनं किं त्यजेयम् ।
धिक् पुरं मन्दिरं पञ्जरं त्वां च धिङ्
नैव ते गिरमिमामनुसरेयम् ॥ ३ ॥

बालकः—

गर्जति वर्षति चाम्बुधरे
वाति च वाते रौद्रतरे ॥ १ ॥

पतति च वर्षोपलनिकरे
क्व नु खलु वत्स्यासि देशवरे ॥ २ ॥

न हि तरुषण्डं न हि नीडं
करिष्यति त्वां गतपीडम् ॥ ३

एहि सखेऽतो मया समं
दुराग्रहं त्यज तर विषमम् ॥ ४ ॥

प्रणयमञ्च मयि मुञ्च भयं
निखिलां विपदं नय विलयम् ॥ ५ ॥

शुकः—

वर्षवातादयस्तोषदाः सर्वदा
तत्तदृतुसंपदा हृष्यतो मे ।
येऽपरे व्यतिकरा आपतन्तीह मां
प्रायशस्तापदाः सन्ति नेमे ॥ १ ॥

विजनमपि काननं भीतिहेतुर्न मे
प्रीतिमुपयामि भो अत्र महतीम् ।
व्यसनमुपजायते किमपि यदि विधिवशाद्
आददे सुखकरीमन्यवसतिम् ॥ २ ॥

स्वैरगतिलालसं भवति मम मानसं
साहसं स्यादिदं त्वदनुसरणम् ।
अवगतं किं न ते पटुमतेरपि सतो
बन्धनं जीवतो भवति मरणम् ॥ ३ ॥

बालकः—

वनान्तरं जिगमिषसि यदा
कस्ते मार्गं दिशति तदा ॥ १ ॥

गुरुतरशैलातिक्रमणं
दुस्तरसागरसंतरणम् ॥ २ ॥

भवति सुशक्यं कथमिव ते
कथयेदं मे मन्दमते ॥ ३ ॥

मित्रपदं नय मां सबलं
मित्रत्वं ह्युपकारफलम् ॥ ४ ॥

अङ्गीकुरु मम साहाय्यं
सफलय निजसुन्दरकायम् ॥ ५ ॥

अयि शुक कुरु मे वचनमिदं
मा भव बहुलापदां पदम् ॥ ६ ॥

शुकः—

येन जनितोऽस्म्यहं पोषितश्चादरात्
तत्कृपा हरति मे व्यसननिकरम् ।
सुमहतां शिखरिणां वारिधीनां तथा
लङ्घनं भवति मेऽतीव सुकरम् ॥ १ ॥

सकलभुवनेश्वरे परमकरुणाकरे
तारयति चिन्तया व्यर्थया किम् ।
मानुषास्त्वादृशाः स्वार्थसाधनपरा
यान्ति विश्वास्यतां मादृशां किम् ॥ २ ॥

मधुरमधुरा गिरो वागुराः केवलं
तासु पतितः सुखं को नु लभते ।
तत्सुखं नो सुखं परवशं यद्भवेत्
तत्र मन्मानसं नैव रमते ॥ ३ ॥

जनुषान्धो बटुः

—:o:—

प्रकाशाभिधं ब्रूत किं वस्तु लोके
न मे भोग्यतां यत्कदाप्येव यायात् ।
सुखानीह चक्षुष्मतां कानि कानि
तदन्धाय भोः ख्यात दीनाय मह्यम् ॥ १ ॥

विचित्राणि वस्तूनि दृष्टानि चद्व्वे
रविं वर्णयध्वे च देदीप्यमानम् ।
विदन्नुष्णतां स्पर्शतो नैव जाने
दिनं वा निशां वा कथं न्वेष कुर्यात् ॥ २ ॥

मदीयं दिनं या विहारस्य वेला
तदा यामिनी मे यदा संविशामि ।
सदा चेद्विनिद्रो भवेयं तदा मे
दिनं नैव रात्रावपीयाद्विरामम् ॥ ३ ॥

मुहुर्दुर्दशां मे सनिःश्वासमेतां
भवन्तोऽनुशोचन्ति कारुण्ययुक्ताः ।
अविज्ञायमानं तु वैकल्यमेतत्
सुशक्यं मया धैर्यमालम्ब्य सोढुम् ॥ ४ ॥

अलभ्यस्य लिप्सा पदं मा करोतु
वृथा स्वास्थ्यनाशाय चित्ते मदीये ।
अनेत्रोऽपि दीनोऽपि गायामि गीतं
यदैवं तदा राजवन्निर्वृणोमि ॥ ५ ॥

स विश्रमो यः श्रमपूर्व एव

तेषु तेषु करणीयेषु व्यापारणीयं मानुषं शरीरं मनश्चेति सुष्ठु व्यवस्थापितं विधात्रा। न ह्येतयोरेकतरमपि स्वं स्वं व्यापारं सम्यगनिस्तीर्य विश्रान्तिसुखं निर्वेष्टुमलम्। धातोः किट्टमिव सम्यगनुपयुज्यमानस्य द्वन्द्वस्यास्य मालिन्यमुपजायते। अपि च कृतोद्यम एव जनो लभते दिव्यां चानन्दमयीं च निद्रां नाम। न खलु नैकचिन्ताकुलितमानसो निरुद्यमो वा निर्भरमनयोपगुह्यते। उक्तं किल केनाप्यवनिपतिना नक्तमुन्निद्रेण।

अधनाः कति मे प्रजाजना
निजवृत्तिं कथमप्युपार्जितुम्।
निखिलं दिवसं कृतोद्यमाः
क्षणदायां खलु शेरते सुखम्॥ १॥


किमिवासि ममोपगूहना—
दयि निद्रे रुचिरे पराङ्मुखी।
ननु मां स्पृश पक्ष्मणोर्मनाङ्
नय सर्वान् विषयांश्च विस्मृतिम्॥ २॥

इति।

तैस्तैराङ्ग्लकविभिर्भगवतीं निद्रामधिकृत्य विरचितानि विलसन्ति नानाविधानि प्रशस्तिवचनानि। इयं किल कोमला धात्री निसर्गस्य। आवरणं चिन्तायाः। अन्नं क्षुधाशान्तिकरम्। पेयं तृष्णापहरम्। अपरं च। अनलायत इयं शैत्यनिवारणे। जलायते दाहनिर्वापणे।

द्रविणायते निखिलसुखसाधनोपलब्धौ । राजानं रङ्केण रङ्कं च राज्ञा पण्डितं मूर्खेण मूर्खं च पण्डितेन समतां नयन्ती तुलेयम् । इत्येवं बहुप्रकाराणि सुबहूनि स्तोत्राणि गीतानि कविवर्यैः ।

किं बहुना । सर्वथानर्घ्य एवायमर्थो निद्रासंज्ञकः । न चास्य प्राप्त्यर्थं किमपि देशान्तरं गन्तव्यम् । अहश्चेत् केवलं समुचितैर्व्यवसायैर्नीयेत तदा नियतं निशायां निद्राम्युपेयात् ।



लेखनी

——:o:——

अयि लेखनि सन्मनोरमे
रमतां मे त्वयि मानसं सदा ।
स्वगुणैर्गुणशालिनि प्रथां
परमामत्र गतासि भूतले ॥ १ ॥

वनजामपि पौरमोहिनीं
तव मूर्तिं चतुरे विलोकयन् ।
स्पृहयामि समामयाम ते
प्रणयं मे न विहन्तुमर्हसि ॥ २ ॥

स्वकरेण बिभर्ति सादरं
सकलस्त्वां किल साक्षरो जनः ।
रुचिरां च विलोक्य तावकीं
गतिमानन्दमुपैति निर्भरम् ॥ ३ ॥

सुखयन् कुशलेन दूरतो
विरहार्तां हृदयस्य वल्लभाम् ।
शरणं रमणः समुत्सुकः
पटुदूतीं भवतीं प्रपद्यते ॥ ४ ॥

कति वादरणे विशारदा
भवतीं खड्गमिवोपयुञ्जते ।
सुतरां प्रतिपक्षखण्डने
तव धारा प्रखरा पटीयसी ॥ ५ ॥

विदुषां हृदयावनीं शुभे-
निजलेखैर्विभिनत्सि लीलया ।
वपसे विविधानि तत्र च
ननु बीजानि फलोपलब्धये ॥ ६ ॥

रणवारिणि सन्धिकारिणि
त्वदधीनानि सुखानि भूभुजाम् ।
विविधं किल वाङ्मयं त्वया
धरणेर्ऋद्धिकरं प्रसूयते ॥ ७ ॥

न हि नह्यशुभाय कल्पते
वदनं कृष्णमपीह ते शुभे ।
शुभकर्मकरं हि शोभनं
शुभरूपं न च तादृशं विदुः ॥ ८ ॥

परमाद्भुतकर्मकारिणि
न हि दोषाय तव द्विजिह्वता ।
न सहस्रमुखोऽपि वाग्बले
तव साम्यं ह्यधिरोढुमर्हति ॥ ९ ॥

अयि काष्ठमयी तनुस्तव
बत जीवोऽप्यणुरेव दृश्यते ।
परमस्तु तवैष विक्रमो
निखिलान् मोहयसे गिरैव यत् ॥ १० ॥

रुदितं हसितं भयं मुदं
हियमुत्पादयसे तदा तदा
स्फुरितं भुजयोस्तनोषि च
तव चेष्टा विलसन्ति नैकधा ॥ ११ ॥

मधुरालापपरे मनस्विनि
रसिकोत्तंसमनोविनोदिनि ।
अयि लेखनि लालिता मया
सविलासं लल मे समागमे ॥ १२ ॥

गुणलुब्धमिमं जनं प्रिये
भजमानं भजसे न चेन्मुदा ।
मम निष्फलमेव जीवितं
रतिमन्यत्र कुतोऽप्यविन्दतः ॥ १३ ॥

बलीयसी केवलमीश्वरेच्छा

कस्मिंश्चित्कानने कस्यापि वटवृक्षस्योपरि कपोतमिथुनमेकं चिराय कृतनिलयमासीत् । एकदा कपोतो मृगयुत्रासात् कपोतीमवादीत् । हा प्रिये । प्रत्यासन्नप्रायो निधनसमय एवावयोः । तथा हि तरोरस्य मूले व्याधः कश्चिदधिज्यं धनुरादाय नौ शरव्यतां निनीषुस्तिष्ठति इतश्चेत् प्रोड्डीय व्यपगन्तुं प्रयतिष्यावहे तदा योऽयं श्येन उपर्युपरि परिभ्रमन्नास्ते स नावभिपत्य भक्ष्यस्थाने करिष्यति । तत्कथं नु खलु विपदमिमामुत्तरितुं शक्नुयावेति ।

एवं भाविनोऽनर्थस्य शङ्कया व्याकुलीक्रियमाणं दिङ्मोहमिवोपगतं भर्तारं सान्त्वयन्ती कपोती प्रोवाच । नाथ । किमिति भवतैवं चिन्ताक्रान्तेन भूयते । यानि व्यसनानि शैलपातमापतन्ति तानि खलु परमेश्वरस्य प्रसादात् तृणनाशं नश्यन्ति । तच्छुचो वशं मा गाः । अनतिक्रमणीया किलेच्छा जगदीशितुरिति ।

एवं वदन्त्यामेव तस्यां घोरविषः कश्चिद्दन्दशूकः सहसा प्रादुर्भूय व्याधस्य तस्य दक्षिणं पार्ष्णिमदाङ्क्षीत् । विषमूर्च्छितस्य तस्य सायको निमित्तादपराद्धः सन् कपोतावनिर्भिद्य तज्जिघत्सया तत्र परिभ्रमन्तं श्येनमेव निरविध्यत् । येनासौ श्येनो विगतासुर्भुवि निपपात । व्याधोऽप्याशीविषविषवशाद् व्यपद्यत । एवं तौ दम्पती मृत्युमुखादिव विनिर्मुक्तौ

सर्वैरपि सर्वदा सर्वेश्वर एव सर्वभावेन शरणीकरणीयः ।

अहो मुग्धता शिशूनाम्

स्वभावेन मुग्धः सदानन्दवृत्ति—
रनभ्यन्तरः संसृतेर्यातनानाम् ।
शिशुश्चेतनामस्फुरत्सर्वगात्रः
कथं नाम नामापि जानातु मृत्योः ॥ १ ॥

कुटीरालयालोकि बाला मयैका
भवाम्यष्टवर्षेति सा मामवादीत् ।
तदीयालकाः सान्द्रभावं प्रपन्नाः
शिरोमण्डले संकुलाभिर्वलीभिः ॥ २ ॥

स्वरूपेण वेषेण च स्पष्टयन्ती
वनग्रामवास्तव्यतामात्मनः सा ।
भृशं चारुनेत्रा वपुःसौष्ठवेन
मनः सान्द्रमोदं मदीयं व्यधत्त ॥ ३ ॥

स्वसारस्तथा भ्रातरश्चापि बाले
मिलित्वा समस्ताः कति स्थेति पृष्टा ।
दृशं विस्मयाद्विक्षिपन्त्यब्रवीन्मां
ननु स्मो वयं सप्त सर्वे मिलित्वा ॥ ४ ॥

ततस्ते क्व सन्तीति पृष्टा न्यगादीत्
ध्रुवं सप्तसंख्या वयं तात सर्वे ।
द्वयोः काण्वदेशे निवासोऽपरौ द्वौ
पयोधिं गतौ नाविकत्वं प्रपद्य ॥ ५ ॥

मदीया स्वसैका तथा सोदरश्चे—
त्यमू द्वौ सुखेन श्मशाने शयाते ।
अहं चैत्यभूमौ कुटीरे वसामि
तयोः संनिधावम्बया सार्धमत्र ॥ ६ ॥

मयोक्तं तदा बालिके धावसि त्वं
यतश्चेतनानि त्वदीयाङ्ककानि ।
द्वयं चेच्छ्मशाने शयानं मवाक्षि
ततोऽवस्थिताः केवलं पञ्च यूयम् ॥ ७ ॥

पुनः सप्ततां सोदराणां ब्रुवाणा
मयाबोधि बालेदृशीं वाचमुक्त्वा ।
श्मशाने स्थितौ यौ गतौ पञ्चतां तौ
तथात्मा तयोः स्वर्गलोके स्थितश्च ॥ ८ ॥

वृथैवं मयायासिता वाङ्मदीया
स्थिरा बालिकाया हि धीर्न व्यचालीत्
वयं तात सप्तैव मिथ्या न मे वाक्—
इति व्याहरन्ती च सा न व्यरंसीत् ॥ ९ ॥

गन्धमूल्यम्

—:o:—

[प्रविश्य विपणिस्थ आपाणिकोऽग्रतश्चरन् निर्धनश्च]

आपणिकः—

रे रे निर्धन दीनवदन वद
मन्दपदं किं व्रजसि पथा ।
विपणिमिमां मे चञ्चललोचन
मुहुर्वीक्षसे किमिति वृथा ॥ १ ॥

निर्धनः—

अयि भो विपणिन् धनिक महाशय
किमिति यामि शृणु मन्दपदम् ।
दृष्टमात्रमपि लोभयते मां
मिष्टं तावकमन्नमिदम् ॥ २ ॥

आपणिकः—

अस्ति धनं यदि तर्पय रसनां
नो चेदपसर दूरतरम् ।
मा मम विपणेः पुरः स्थितिं भज
मार्गमिमं त्यज कृतत्वरम् ॥ ३ ॥

निर्धनः—

नास्ति धनं मे खाद्यं क्रेतुं
न पुनरितोऽपसरेयमहम् ।
न प्रभुता पथि तवेह तदलं
निगद्य वचनं सुदुःसहम् ॥ ४ ॥

आपणिकः—

रे रे जिघ्रसि किं प्रसरन्तं
मदन्नगन्धं मधुरतरम् ।
परान्नलोलुप नापत्रपसे
वदन् वचनमिदमतिचतुरम् ॥ ५ ॥

निर्धनः—

अयि पटुबुद्धे निजान्नगन्धं
वहन्तमेतं गन्धवहम् ।
किं न नियच्छसि मुधा चिकीर्षसि
निरागसो मे विनिग्रहम् ॥ ६ ॥

आपणिकः—

कालमियन्तं यत्तर्पयसे
सुवासमाघ्राय घ्राणम् ।
भोजनार्धमितमूल्यमदत्त्वा
नैतद्घ्रातव्यं स्थानम् ॥ ७ ॥

निर्धनः—

अकिञ्चनोऽहं मूल्यं दातुं
शक्नोमि न न च वाञ्छामि ।
न हि याचितुमिदमुचितमपि स्या-
न्मूढमतिं त्वां गणयामि ॥ ८ ॥

आपणिकः—

रे मन्दात्मन्नधिक्षिपसि मां
तद् भुङ्क्ष्व स्वाविनयफलम् ।
योऽयमिहैति हि रक्षापुरुषः
स दर्शयेत्त्वां स्वभुजबलम् ॥ ९ ॥

[ततः प्रविशति रक्षापुरुषो दण्डहस्तः]

रक्षापुरुषः—(उभौ प्रति)

रे रे कितवौ किं विवदेथे
सार्वजनिक इह राजपथे ।
वस्तुं वाञ्छा कारागारे
किमित्यस्तामितदयाकथे ॥ १० ॥

निर्धनः—(रक्षापुरुषं प्रति)

अयि करुणाकर मा कुरु कोपं
मा दण्डय मां दीनजनम् ।
रुणद्धि मामयमापणिकः पथि
मार्गति गन्धकृते च धनम् ॥ ११ ॥

आपणिकः—(रक्षापुरुषं प्रति)

भो न्यायप्रिय राजपुरुष मम
पक्वान्नानामयममुना ।
घ्रातो गन्धो न पुनर्मूल्यं
दत्तमितीयं कदर्थना ॥ १२ ॥

रक्षापुरुषः—(आपणिकं प्रति)

युक्तमाह खलु भवानवश्यं
तवापि तृप्तिः करणीया ।
दानं सुसदृशमनेन ददता
साधुरीतिरनुसरणीया ॥ १३ ॥

(निर्धनं प्रति)

एहि भद्रमुख नाणकयुगलं
गृहाण घर्षय परस्परम् ।
सपदि जनय झणझणायितं कुरु
महात्मनोऽस्य श्रवणचरम् ॥ १४ ॥

(निर्धनेन तथा कृते आपणिकं प्रति)

त्वदन्नगन्धं चिरं जिघ्रतो
घ्राणमस्य किल तृप्तिमितम् ।
तन्नाणकझणझणायितेन
श्रवणयुगं तव संतृप्तम् ॥ १५ ॥

लब्धं मन्ये त्वया सर्वथा
गन्धमूल्यमनुरूपमिदम् ।
गच्छ समाश्रय विपणिं मा भव
सकलमिलितजनहासपदम् ॥ १६ ॥

निर्धनः—(रक्षापुरुषं प्रति)

देवदूत इव भासि नयपटो

आपणिकः—

मूर्खशिरोमणिरहं कथम् ।

रक्षापुरुषः—(आपणिकं प्रति)

मा विमना भव विनयमुपाश्रय
मा पुनरनुसर कलहपथम् ॥ १७ ॥

आपणिकः—(उभौ प्रति)

युवामिदानीमुपयातौ मम
सखित्वमिति भो इत एतम् ।
मदन्नसेवनतर्पितरसनौ
सुखेन सदनं प्रति यातम् ॥ १८ ॥

त्रयः—(समेत्य श्रोतॄन् प्रति)

शृणुत शृणुत भो जनाः समस्ता
वच इदमस्माकं सारम् ।
मा विवदध्वं मा विवदध्वं
मा विवदध्वं परस्परम् ॥ १९ ॥



प्रत्युत्पन्नमतिः प्राप्तां क्रियां कर्तुं व्यवस्यति

आसीन्महाप्रभावस्य पीटराख्यस्य राज्ञो नर्मसचिवः कोऽपि। ईदृशी किलास्य प्रसिद्धिरभूद्यदयं बुद्धिसामर्थ्यात् सुदुस्तराण्यपि दुर्गाण्यतितरति स्म तारयति स्म चान्यान् व्यसनार्णवमग्नान् यथा कथंचिदपीति।

कदाचित् कोऽप्यस्य पितृव्यसूनू राज्ञोऽप्रीतिभाजनतां गतो वधदण्डेन योजयितव्य आसीत्। तदा स नर्मसचिवस्तदपराधक्षमां यियाचिषुः सदोगतं राजानमुपतस्थौ। तं तु सभागृहं प्रविशन्तं वीक्ष्य तदाशयं चाभ्यूह्य राजा शपथपूर्वकमवादीत्। वयस्य। सर्वथा निष्फलं तवेहागमनम्। यद्धीदानीं त्वयाहं याच्यस्तन्नैव प्रतिपत्स्य इति।

नर्मसचिवस्त्वेतन्निशम्य मनोजव इव सहसा क्षितितलनिहित जानुयुगलः सप्रश्रयं प्रोदगिरत्। नन्वियमेव मेऽभ्यर्थना देवचरणयोर्यदयं मे पितृव्यसूनुरकालहीनं हन्तव्यो महाराजेनेति। तदनु स भूपतिः स्वेनैव वचसा गृहीतः केवलं स्मितमकरोदागस्कृतं च तमक्षमत।



पृथ्वीस्तवः

—:o:—

पद्यम्

अयि मेदिनि भो अद्भुतरूपे
सुरुचिरतनुमण्डिते ।
परमविस्तृते विशाललवणा-
म्भोनिधिवलयाङ्किते ॥ १ ॥

विविधाद्भुततृणसंवृतवक्षः-
स्थले भूतधारिणि ।
कियानुदारो वेषोऽयं तव
विलसति गुणशालिनि ॥ २ ॥

जगत्पावनः पवनोऽविरतं
तव पृष्ठे वहति ।
जगदुपकारायैव पादपा-
ननिशं कम्पयति ॥ ३ ॥

तरङ्गयति सलिलं भ्रमयति
पेषणयन्त्रततिम् ।
स्वैरं गायति शैलशिखरगत
ईशगुणानां स्तुतिम् ॥ ४ ॥

सस्यभारनम्रता त्वदीय-
क्षेत्रेष्ववलोक्यते ।
विपुलजलानां त्वदापगाना-
मुदारता लक्ष्यते ॥ ५ ॥

कति नगराण्युपवनानि कति निज-
पृष्ठे धारयासि ।
कति शैलान् कति वनान्यपि च कति
जीवान् पोषयसि ।। ६ ।।

जगदुपकारिणि वसुन्धरे ते
कासौ गुणगरिमा ।
वर्णयितुं त्वामुद्यतस्य मे
कायं मतिलघिमा ।। ७ ।।



दुर्योधनानुशासनम्

धृतराष्ट्रः—(कृष्णं प्रति)

केशव । यत्त्वमात्थ तद्धर्म्यं च न्याय्यं च हितकरं चेति नास्ति सन्देहः । यदिदं दुरात्मना दुर्योधनेन चिकीर्षितं तन्नैव मे प्रियं स्तोकांशेनापि । त्वद्वचसि स्थातव्यमिति मे निश्चिता मतिः । किं पुनः करवाणि । सर्वथा पराधीनोऽस्मि संवृत्तः । न किलात्मनोऽपि प्रभवामि । तदङ्ग मन्दमतिं शास्त्रातिगं दुर्योधनमेवानुनेतुं प्रयतितव्यं भवता । न खल्वयं शृणोति वचनं गान्धार्या न धीमतो विदुरस्य न चाप्यन्येषां सुहृदां हितैषिणां भीष्मादीनाम् । स भवान् स्वयमेवै-नमनुशास्तु । एवं हि सुमहत् खलु सुहृत्कार्यं ते कृतं स्यात् ।

कृष्णः—(दुर्योधनाभिमुखो भूत्वा)

अयि कुरुराज दुर्योधन । सानुबन्धस्य तव शर्मार्थं किंचिदभि-धातुकामोऽस्मि । तदवहितेन चेतसा श्रोतव्यमिदं मे वचनम् । न हि न भवान् भवति भाजनमुपदेशस्य । कथं नु त्वादृशः कुलीनो बुद्धिमान् श्रुतसंपन्नो विविधगुणगणमण्डितो न कर्णे कुर्यात्पथ्यमुक्तम् । यदिदानीं ते मनसि वर्तते न किल तत्सदृशं भवादृशानामभिजनव-ताम् । दौष्कुलेया दुरात्मानो नृशंसा निरपत्रपा एव पन्थानमिम-मुररीकर्तुमर्हन्ति । इह हि जगतीतले धर्मार्थानुकूला सततं लक्ष्यते सतां प्रवृत्तिः । असतामेव तु विपरीता । त्वं तावदात्मानं सदाचारं कलयसि । विपरीतेयं पुनरसकृल्लक्ष्यते त्वयि वृत्तिः । यदि चात्र विषये नाद्यापि दुराग्रहमात्मनो विहास्यसि तदा महानधर्मो भविष्यति नितान्तमनिष्टो घोरः प्राणहरश्चानर्थ उपनिपतिष्यति । प्रयुक्तसामसु

पाण्डवेषु वस्तुतस्त्वनिमित्त एवायमनर्थोपनिपातः। सकृदुपनतोऽर्थं न कथंचिन्निवारयितुं शक्यः। तदिममनर्थं परिहरम् श्रेयसात्मानं योजयितुमर्हसि। एवं हि ते भ्रातरश्च भृत्याश्च सुहृदश्च सुखभाजो भविष्यन्ति त्वं च स्वयमधर्म्याच्चायशस्याच्च कर्मणः प्रमोक्ष्यसे। सर्वथा संधेयाः खलु ते पाण्डवाः। न ह्येतैः प्राज्ञैः शूरैर्महोत्साहैरात्मविद्भिः सन्दधानः शोच्यतां यास्यसि। अभिमतोऽयमर्थो धीमतो धृतराष्ट्रस्य पितामहादीनां चान्येषां महामतीनाम्। ज्ञातीनां च मित्राणां च किं बहुना निखिलस्यापि जगतो भूयसे शर्मणे संपत्स्यतेऽयं शमः। तत्तात तिष्ठ पितुः शासने। मातिक्रमीराज्ञां मातृदेव्याः। एतद्धि परं श्रेयो मन्यन्ते विपाश्चितो यत्पितरौ पुत्राननुशिष्टः।

उत्तमापद्गतः सर्वः पितुः स्मरति शासनम्।



नदी

—:o:—

कुमारः—(उदधिपातोन्मुखीं नदीं प्रति)

कथय मे सुभगे नदि सत्वरं
कुत इमानि जलानि वहन्ति ते ।
वद वद क्व नु मन्दगतिः शुचा
व्रजसि केन बलादुत नीयसे ॥ १ ॥

नदी—(कुमारं प्रति)

मम विलोक्य दशां विधुरामिमां
किमिति वत्स वृथा विमनायसे ।
क्व हि मदीयमिदं व्यसनं महत्
क्व च तदुद्धरणेऽक्षमता तव ॥ २ ॥

सुविदिता जननी मम शैलभू-
र्दिवि विराजति वारिधरः पिता ।
द्रुमसुमावरणा वननिर्झराः
सुसलिला विलसन्ति सहोदराः ॥ ३ ॥

अथ कदाचिदहं निजसद्मनो
द्रुतपदं सहसैव विनिर्गता ।
तदनु खेलगतिर्मृदुहासिनी
विहृतिमात्रमतिः पुरतोऽसरम् ॥ ४ ॥

निजपदं प्रविहाय समुन्नतं
  सरभसं पतिताहमधो वने ।
प्रियसखीवदधारयतां तु मां
  सपदि तीरभुवौ तृणभूषिते ॥ ५ ॥

निदधती सविलासमहं तदा
  मितमितानि पदानि शनैःशनैः ।
विटपिभिर्मृदुरक्तसुमाधरै-
  रसकृदेव नतैः परिचुम्बिता ॥ ६ ॥

अवसितान्यखिलान्यपि संप्रति
  मम सुखानि विपत्तिरुपस्थिता ।
अयमसौ जलधिर्विततानना
  ह्वयति मां ननु पश्य जिघत्सया ॥ ७ ॥

विफलजन्मतयाऽनुशयान्विता
  शमरता गतिमान्द्यमहं श्रये ।
त्वमिह वत्स तथा चरितं चर
  न हि यथा प्रवया अनुतप्स्यसे ॥ ८ ॥

गतिः सोच्छ्रायाणां पतनमनुकूलं कलयति

कश्चित्तुरगो महता साङ्ग्रामिकेण पर्याणेन समलंकृतकायः फेनिलां वल्गां चर्वन्नुच्चैश्च निनदन् केनचिन्मार्गेणापचक्राम तारपरुषैश्च हेषारवैरभितो वर्तमानेषु शैलेष्वपि महान्तं प्रतिध्वनिं जनयामास । यावदसौ नातिदूरं याति तावत्तेनैव पथा मन्दं मन्दं संचरमाणो गरीयसा च भारेणावसन्नो रासभः कश्चित्तेन समासादि । तदात्व एव स तुरंगमः स्वामी सेवकमिव तं चक्रीवन्तं साटोपमाहूय परुषाक्षरैर्वचनैरेवं तर्जयामास । रे रे लम्बकर्ण । सुदूरमपसर । नो चेन्मत्पादाघातेन चूर्णितः कर्दमे निपतिष्यसीति । इदं तदीयं वचनमाकर्ण्य स वराकः सहिष्णुर्गर्दभस्तमर्थमधिकृत्य तेन कलहायितुमधृष्णुवन् यावत्या त्वरया गन्तुं शक्यं तावतीमवलम्ब्य मार्गादपससार तुरगाय चावकाशं ददौ ।

अथ नातिचिरादिव स एव तुरंगमो रणभुवि शरपातेन चक्षुषि विद्धः परामदर्शनीयतामगात् साङ्ग्रामिकेषु च कार्येषूपयोगानर्होऽभूत् । अतोऽसावपहृतसकलभूषणः कस्मैचिद्भारवाहकाय मूल्येनादायि । रासभोऽपि कदाचित्तमिमां विधुरां दशामापन्नमवलोक्य न्यचिन्तयत् । मयाप्ययमिदानीं सम्यगधिक्षेपणीय इति । अतोऽसौ व्यवस्थापितवाक् तं वाजिनमेवमवादीत् । नमस्ते नमस्ते सखे नमस्ते । कथं न्विमेऽत्रभवन्त एवमवस्थिताः । ननु सदैव मयैवं विभावितं यदुदीर्णस्य ते दर्पोऽद्य वा श्वो वा शातयिष्यत इति ।

विस्मयद्धयम्

—:o,—

अस्ताद्रिमासेदुषि चण्डरश्मौ
विश्रान्तिकाले समुपस्थितेऽपि ।
क्षितिं खनन् कश्चन कर्मकारो
न कर्मणः स्वाद्विरतो बभूव ॥ १ ॥

तदा निजार्श्वाययुतो महात्मा
राजा व्रजंस्तेन पथा पुरीं स्वाम् ।
तस्यैव वृद्धस्य समीपमश्वं
संयम्य वीथ्यां स्थितिभागपृच्छत् ॥ २ ॥

सखे किमर्थं क्रममागतोऽपि
प्रदोषकाले श्रममातनोषि ।
कृतश्रमेणात्र हि मानवेन
मुक्तेन भाव्यं किल विश्रमाय ॥ ३ ॥

सदैव मुक्तोऽस्मि न जातु बद्धः
प्रत्यूष एव प्रजहामि शय्याम् ।
तावच्च कार्याणि करोमि यावत्
प्रायेण दृष्टिक्षममस्ति चक्षुः ॥ ४ ॥

इति प्रगल्भं वचनं ब्रुवाणो
राज्ञा स वृद्धः पुनरप्यवाचि ।
आत्मानमायासयमान एवं
कियन्तमर्थं लभसे त्वमह्ना ॥ ५ ॥

अष्टाणकान् प्रत्यहमर्जयेऽह-
मिति ब्रुवन् भूपतिना स पृष्टः ।
एतावता स्वल्पतरेण भद्र
कथं नु वृत्तिं कुरुषे धनेन ॥ ६ ॥

युञ्जे सदारो द्वयमात्मनोऽर्थे
ऋणे द्वयं न्यास इति द्वयं च ।
कार्यक्षमे ये भवतो न ताभ्यां
ददामि तुर्यं द्वयमादरेण ॥ ७ ॥

इत्येवमुक्तोऽवनिपस्तमाह
ऋणं त्वया कस्य नु शोधनीयम् ।
स कर्मकारो वचनं तदानी-
मिदं यथार्थं प्रतिपद्यते स्म ॥ ८ ॥

यया मदर्थे सुचिरं विसोढाः
क्लेशाः प्रभूताः परिवर्धयन्त्या ।
या कल्पते संप्रति विश्रमाय
तस्या ऋणं मे ननु शोधनीयम् ॥ ९ ॥

स्वोपार्जितेषु द्वयमाणकेषु
कस्मिन्नु निक्षेपमिवादधासि ।
तन्मे भवान् शंसतु वीतशङ्क-
मिति क्षितीशो निजगाद भूयः ॥ १० ॥

निजात्मजानां विनये विसृष्टं
द्रव्यं खलु न्यासतया विगण्यम् ।
ते विक्लवं मां जरया त्रयोऽपि
भार्यान्वितं किं तु भरेयुरन्ते ॥ ११ ॥

तं सादरं भूपतिरन्वयुङ्क्त
द्रव्यं तुरीयं प्रददासि काभ्याम् ।
तदा स बाष्पोद्गमरुद्धकण्ठः
सगद्गदं वाचमिमामुवाच ॥ १२ ॥

मम स्वसारौ जरयाभिभूते
पङ्गुत्वमासाद्य गृहे स्थिते स्तः ।
अन्नं च वस्त्रं च ददामि ताभ्यां
स्मरन् परेशस्य परं प्रभावम् ॥ १३ ॥

उद्बाष्पनेत्रः स नृपो महात्मा
प्रसन्नचेतास्तमभाषतैवम्
यद्विस्मयं मे कृतवानसि त्वं
तवाप्यहं विस्मयमादधामि ॥ १४ ॥

यं मां पुरः पश्यसि भाषमाणं
सोऽहं महीपालपदं बिभर्मि ।
करे करं देहि निजं मदीये
यत्स्पर्शतो धन्यतमो भवेयम् ॥ १५ ॥

इत्येवमुक्त्वावनिपेन तेन
दत्तः करे तस्य सुवर्णराशिः ।
आज्ञापितश्च प्रणयात् स वृद्धो
मा तात संकोचमुपेहि गृह्णन् ॥ १६ ॥

यदाणकैरष्टभिरेव रक्षन्
न खिद्यसे प्रत्यहमष्ट जीवान् ।
तत्ते धनं भो विपुलं प्रदद्यां
प्रयोजनं तेन भवेद्यदा ते ॥ १७ ॥

मूलं मा भूदापदः कालसङ्गः

स्वायुर्नयन्तं सकृदेव कापि
वेलानुकूला नरमभ्युपैति।
न तामतिक्रामति यः स एव
ऋद्धिं परां विन्दति जीवलोके ॥ १ ॥

उपस्थितं कालमुपेक्षते यः
स तं पुनर्लब्धुमनीश एव।
आ जीवितान्ताद्विपदाभिभूतो
मनोरथान् स्वान् विफलीकरोति ॥ २ ॥

त्रिविधः कालो भूतश्च भविष्यंश्च वर्तमानश्चेति। यस्तु भूतो नाम स खल्वसंनिवृत्त्यै गत एव। भविष्यतोऽप्यवाप्तिरनिश्चितैव क्षणभङ्गुरत्वाज्जीवितस्य। तद्वर्तमान एव प्रवर्तितुं युक्तमस्माभिः स्वहितसाधने। उक्तं हि भगवता व्यासेन।

श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम्।
न हि प्रतीक्षते मृत्युः कृतमस्य न वा कृतम् ॥ १ ॥


इति। न हि कदाचित् कार्याणि चिकीर्षता 'शतायुर्वै पुरुषः' इति भावनया कालसङ्गः कर्तव्योऽनर्थबहुलत्वादेतस्य। यदिह प्रारिप्सितं तन्मानवेन लब्धावसरेण सम्यगारम्भणीयम्। स्वारम्भो हि कर्मणां सिद्धिमुपनमयाति। यद्धि कालान्तरापेक्षया सकृदकृतमेवावतिष्ठते तत्पश्चात्क्रियमाणं समधिकमेव सुदुर्घटं भवति।

स्फुलिङ्गावस्थया वह्निर्यावत् संतिष्ठते क्षणम् ।
तावच्छमयितुं शक्यः पादस्पर्शेन केवलम् ॥ १ ॥

स एवोपेक्ष्यमाणः सन् सुतरां दीप्यते यदा
अद्भिर्वापीशतस्यापि न निर्वापयितुं क्षमः ॥ २ ॥

एवं यत् सुकरं काले तत्तदा चेदुपेक्षितम्
महतापि प्रयासेन पश्चात्तन्नैव साध्यते ॥ ३ ॥

अतीतं कालं स्मरणेन, वर्तमानं क्रियया, अनागतं च प्रसमीक्ष्या समुपचरन् सुखमेधते मानवः । न हि गतं शोचन् वर्तमान उत्साहसंपन्नो भवति । अनुत्साहवान् कर्तव्याद्विमुखीभूयायतौ प्राप्णीयानि समुद्यमफलानि नाधिगच्छति करोति चात्मानं महतो दुःखस्य भाजनम् ।



सज्जनदुर्जनभेदः

—;o:—

शुभानि वाक्यान्यशुभानि चापि
शृण्वन् परैः स्वैरमुदीरितानि ।
खलोऽशुभान्येव ततो वृणीते
यथैव भक्ष्येषु किरिः पुरीषम् ॥ १ ॥

साधुस्तु शृण्वन् वदतां नराणां
शुभानि वाक्यान्यशुभानि चापि ।
आद्यानि गृह्णात्यपराणि मुक्त्वा
हंसो यथा क्षीरमपो विहाय ॥ २ ॥

साधुर्यथान्यानपभाषमाणः
परं परीतापमुपैति चित्ते
चित्रं तथान्यानपभाषमाणः
परं परीतोपमुपैत्यसाधुः ॥ ३ ॥

अहो अपूर्वः किल कोपवह्निः
साधोरसाधोश्च हृदि प्रदीप्तः ।
स्नेहाच्छमं याति स सज्जनस्य
वृद्धिं खलस्यैति च वारितोऽपि ॥ ४ ॥

स्मरन्तोऽपि यत्सन्त आयान्ति ताप-
मसन्तो हसन्तस्तदेवाचरन्ति ।
यदिष्टं सतां तत्खलानामनिष्ट-
मनिष्टं सतां यत्खलानां तदिष्टम् ॥ ५ ॥

हेमन्तोपगमः

—:o:—

शरद्व्यपाये कदाचित् प्रभातायामेव शर्वर्यां सीतासमेतः श्रीमान् दाशरथिर्भ्रात्रा लक्ष्मणेन सहाभिषेकार्थं रम्यां गोदावरीमियासीत्। तदा कामिनां प्रियं हेमन्तमृतुमुपस्थितमवलोक्य सौमित्रिः शुश्रूषासंपरितुष्टं प्रियवादिनं ज्येष्ठं भ्रातरमेवमवादीत्।

प्रिय एष तव प्रियंवद
ननु हेमन्त उपागतोऽधुना।
स्वगुणैर्निखिलां करोति यः
पृथिवीं सस्यसमृद्धिशालिनीम्॥ १॥

दिशमन्तकसेवितां दृढं
भजमाने द्युमणौ विधेर्वशात्।
तिलकेन विना यथाङ्गना
दिगुदीची न विराजतेऽधुना॥ २॥

हिमकोशयुतः स्वभावतः
सवितुर्दूरतया च संप्रति।
हिमवान् हिमवत्पदं निजं
नयति व्यक्ततया यथार्थताम्॥ ३॥

न विभाति तुषारधूसरा
विधुबिम्बे सकलेऽपि कौमुदी।
इयमातपकृष्णविग्रहा
सुकुमारी दयिता यथा तव॥ ४॥

गतकान्ति तुषारधूसरं
  निजबिम्बं शशलाञ्छनो वहन्
न विराजति दर्पणो यथा
  मुखनिःश्वासमलीमसीकृतः ॥ ५ ॥

उदितोऽपि दिवाकरोऽधुना
  हिमनीहारसुसंवृतैः करैः ।
उपयद्भिरधो नभस्तलाद्
  रजनीनाथ इवावभासते ॥ ६ ॥

विहगा जलचारिणोऽप्यमी
  उपविष्टाः सविधेऽपि संप्रति
प्रविशन्ति न शैत्यपीडिताः
  सलिलं कापुरुषा इवाहवम् ॥ ७ ॥

स्मृतिशेषसमग्रसौष्ठवा-
  स्तुहिनम्लानविशीर्णपङ्कजाः ।
जरयोपहता इवाङ्गनाः
  कमलिन्यो न विभान्ति सांप्रतम् ॥ ८ ॥

विशीर्णपर्णा गतपुष्पगुच्छा
  भृङ्गैर्विहीना वनवीरुधोऽमूः ।
मन्ये विमुक्ताभरणा अहासा
  मौनव्रताः प्रोषितभर्तृका नु ॥ ९ ॥

रात्राववश्यायसमावृताश्च ।
नीहारनद्धाश्च निशावसाने ।
इमा विपुष्पा वनराजयोऽत्र
गाढं प्रसुप्ता इव भान्ति सर्वाः ॥ १० ॥

अस्मिंस्तु काले भरतो महात्मा
पुरे वसंस्तापसवेशधारी ।
नूनं निशायां धरणौ शयानो
भोगान् सुसाध्यानपि नोपभुङ्क्ते ॥ ११ ॥

वेलामिमां सोऽपि समुत्थितः सन्
स्नानाय नित्यं सरयूं प्रयाति ।
कथं कृशोऽसौ सुकुमारकायो
हिमं सहेतेति भृशं विदूये ॥ १२ ॥

स्थालपिष्टाष्टकम्

——:o:——

धान्यानामुक्तिमालेयं स्थालपिष्टोपयोगिनाम् ।
कण्ठे कार्या प्रयत्नेन भारते लब्धजन्मभिः ॥

——:o,——

न किं जातिभेदो न किं वर्णभेदो
वरीवृत्यतेऽस्मासु सृष्टेः स्वभावात् ।
प्रसङ्गे सति त्वेकतामेव यामो
न च द्वैतबुद्धिस्तदा बाधते नः ॥ १ ॥

समस्तानि धान्यानि मान्यानि लोके
वयं नास्महे किं मुदैवैकशूर्पे ।
न किं दोषनाशाय सङ्गात् कृशानोः
परां संस्कृतिं प्राप्नुमो नस्तनूनाम् ॥ २ ॥

न किं पेषणीघर्षणक्षुण्ण एव
समभ्येति चूर्णत्वमस्माकमात्मा ।
ततो मर्दितान्येकजीवानि भूत्वा
व्रजामो न किं स्निग्धतां तैलयोगात् ॥ ३ ॥

भृशं ताडितान्यङ्गनाभिः स्वताले-
स्ततः स्थालमध्ये सुसंस्थापितानि ।
तदा वह्नियोगाच्च भृष्टानि सम्यक्
प्रपद्यामहे स्थालपिष्टाभिधानम् ॥ ४ ॥

रसास्वादमस्माकलभ्य के वा
रमन्ते न लोके रसज्ञा नितान्तम् ।
इतीदं रहस्यं प्रतिष्ठाप्रदं नो
भवद्भूतये वर्णितं विस्तरेण ॥ ५ ॥

अहो भारतीया इमामेव रीतिं
निजश्रेयसे सर्व एवानुयात ।
न वा जातिभेदो न वा वर्णभेदो
मनागिष्टलाभे भवत्वन्तरायः ॥ ६ ॥

भवन्त्वेककार्या भवन्तः समस्ता
अधःपातिनीं द्वैतवार्द्धिं विहाय ।
तथा सर्वदोषा विनाशं प्रयान्तु
परा संस्कृतिः प्रोन्नतेर्वोऽस्तु हेतुः ॥ ७ ॥

शरीरस्य तापं व्ययं चायुषोऽपि
स्वदेशस्य हेतोः सदा मर्षयध्वम् ।
निजामार्यतां नूनमन्वर्थयन्तः
कुरुध्वं प्रयत्नेन कर्मावदातम् ॥ ८ ॥

सोऽहम्

मद्यपः—(श्रोतॄन् पानकर्मणि प्रवर्तयन्)

अनादिकालात् कति वा न भूतले
रता अभूवन् मधुपानकर्मणि ।
कथं त्विदं कर्म गुणाय कल्पते
न कोऽपि जानाति जनो विचक्षणः ॥ १ ॥

किमर्थमङ्गीकरणीयमादरा-
दिदं रहस्यं च किमत्र विद्यते ।
विचारयध्वे न कथं मनागपि
सुरां पिबन्तोऽपि मुदा दिवानिशम् ॥ २ ॥

यदीदमज्ञानजमात्मनस्तमो
व्यपोहितुं वाञ्छथ मूढचेतसः ।
तदावधानं वचनेऽत्र मामके
मनोहरे सादरमेव यच्छत ॥ ३ ॥

कवीश्वराः पानसुखस्य कोविदा
मधुप्रशंसां बहवोऽत्र कुर्वते ।
न तत्त्वतो मर्म विदन्ति यत्त्वमी
रसस्य लेशोऽपि कुतोऽत्र वर्तताम् ॥ ४ ॥

प्रमोदचन्द्रो हृदये प्रकाशते
मुखस्य कान्तिः सुतरां समेधते ।
सुखत्वबुद्धिर्विषयेषु जायते
मधुप्रभावेण कियानयं स्तवः ॥ ५ ॥

भवन्ति नानाविधदुःखसंकुला
मुमुक्षवो येऽत्र पिबन्तु ते मधु ।
इतीदमेषां विरसं वचः कथं
भवेत् सुपर्याप्तमधुस्तुतिक्षमम् ॥ ६ ॥

सुचारुवर्णैर्यमकैर्मनोहरैः
पदैर्महार्थैर्ललितैश्च को गुणः ।
न सारभूतो मधुनो गुणो यदि
स्वबुद्धिमान्द्यात् कविभिः प्रशस्यते ॥ ७ ॥

गरीयसां तत्वविदां वचोऽमृतं
निपीय वेदान्तगिरां रसं तथा ।
नितान्तसंतुष्टमना ब्रवीम्यहं
परं रहस्यं मधुपानकर्मणः ॥ ८ ॥

समीपमागत्य पिपासया द्रुतं
प्रपूरयध्वं निजपानभाजनम् ।
निधाय पीठे च ततो महादरात् ।
सुसूक्ष्मया पश्यत तत्तलं दृशा ॥ ९ ॥

निगूढमास्ते किमपीह निर्मलं
मनोहरं तत्त्वमनन्तसौख्यदम् ।
यदिन्द्रियार्थोपगमोद्भवात् सुखात्
सदोपभोगार्हतया विशिष्यते ॥ १० ॥

पानस्य कर्ताहमनुष्य, कर्म
सुरोभयं किन्त्विदमेकरूपम् ।
सिद्धान्तमेतं सुतरां मनोज्ञं
समर्थये संप्रति वः पुरस्तात् ॥ ११ ॥

इदं गृह्यते पानपात्रं करेण
मया स्थीयते कायकम्पं विहाय ।
सुरा दृश्यते हस्यते नृत्यते च
मदुक्तस्य युष्मासु संप्रत्ययाय ॥ १२ ॥

परस्तात् कृतिं यामिदानीं करोमि
समुन्मील्य चक्षुर्निरीक्षध्वमेनाम् ।
यया दृष्ट्या विस्मयाक्रान्तचित्ताः
परानन्दभाजः सुरायां रमध्वम् ॥ १३ ॥

अयं पीत एवासवो युष्मदग्रे
शरीरे मदीये लयं संप्रयाति ।
क्व पाता क्व पेयं न भेदोऽत्र कश्चि—
दियं सोऽहमित्यस्य तत्त्वस्य सिद्धिः ॥ १४ ॥

तारास्तवः

—:०:—

विलस विलस तनुमूर्ते तारे
कुरु निजतेजो नभसि ततम् ।
किं त्वमसीति कियन्मम चेतसि
कौतूहलमिदमुपजनितम् ॥ १ ॥

उपर्युपरि जगतोऽस्य नितान्तं
प्रोन्नततमपदकृतवासे ।
कियद्विदूरे गगनमण्डले
हीरकमणिवद्विराजसे ॥ २ ॥

अस्तमने किल भूमण्डलतः
संहृतकिरणे चण्डकरे ।
मन्दोन्मेषं निजप्रकाशं
प्रकटीकुरुषे त्वमम्बरे ॥ ३ ॥

विलस विलस भो निखिलयामिनीं
कुरु निजतेजो वियति ततम्
किं त्वमसीति कियन्मम चेतसि
कौतूहलमिदमुपजानितम् ॥ ४ ॥

नन्दति तन्वपि तमसि तावकं
तेजो लब्ध्वा पान्थततिः ।
विलसेरेवं न चेदियं स्यान्—
मार्गज्ञाने मूढमतिः ॥ ५ ॥

परोपकारं सततमपारं
कारं कारं कथमेतम् ।
नैव क्लाम्यसि मङ्गलमूर्ते
प्रशंसनीयं तव चरितम् ॥ ६ ॥

विलस विलस भो निखिलयामिनीं
कुरु निजतेजो वियाति ततम् ।
किं त्वमसीति कियन्मम चेतसि
कौतूहलमिदमुपजनितम् ॥ ७ ॥



विश्वग्रन्थः

विश्वसृजा विश्वाख्यो
ग्रन्थोऽयं सुन्दरो महान् व्यरचि ।
सादरमुद्धाख्यैर्न
यदत्र लिखितं विलोकनीयं तत् ॥ १ ॥

पत्रे पत्रे विषयः
कोऽत्र कथं वा निरूपितस्तेन ।
इति सावधानमनसा
प्रपश्यतामेष निश्चयो भविता ॥ २ ॥

येनैष विनिरमायि च
येन च निर्दोषतामनायि किल ।
स पटीयान् प्रज्ञावान्
न कोऽपि तदपेक्षया तथाभूतः ॥ ३ ॥

तस्य प्रभुत्वमतुलं
सोऽभिभवति लौकिकान् प्रभून् सर्वान् ।
स किलातिदूरदर्शी
भूतानागतभवत्सु विषयेषु ॥ ४ ॥

न्यायप्रियता समता
सर्वेष्वपि तस्य दृश्यते स्पष्टम् ।
प्रतिपत्रं प्रतिवाक्यं
प्रत्यक्षरमेव तत्कृते ग्रन्थे ॥ ५ ॥

शिशव इव मन्दमतयो
बहिरङ्गेनैव केवलं त्वस्य ।
विचित्रवर्णस्वर्णा-
क्षराङ्कितेन प्रसन्नतां यामः ॥ ६ ॥

भगं स्तुमोऽस्य वन्धं
विहाय यद्वस्तुतः प्रशंसार्हम् ।
अपरिगृहीतार्थाः किल
तल्लिखितानामनर्घ्यवचनानाम् ॥ ७ ॥

यदि जातु दैवयोगा-
द्रमते चेतोऽन्तरङ्ग एतस्य ।
तद्भवति किमपि चित्रं
पत्रप्रान्ते समर्पितं प्रायः ॥ ८ ॥



आनन्दमयी सृष्टिः

पद्यम्

किमिति भो मानवा भवथ शोकाकुला
भजथ चित्ते वृथा किं विषादम् ।
त्यजत सकलां शुचं सपदि मतिनाशिनीं
कुरुत निजमानसं सप्रमोदम् ॥ १ ॥

सृष्टिजननी स्मितं वितनुते सर्वतो
मोदते नभ इदं नीलवर्णम् ।
सुरभिगन्धानिमानुद्गिरन्ती मही
वहति विकसन्मुखं सुप्रसन्नम् ॥ २ ॥

स्थलचरा जलचरा व्योमसंचारिणो
द्रुमशिखरशायिनोऽमी विहङ्गाः ।
बहलहर्षाकुलाः कलकलं कुर्वते
मञ्जु गुञ्जन्त्यमी मत्तभृङ्गाः ॥ ३ ॥

नीरदानां ततिर्विततगगनाङ्गणे
खेलतीतस्ततः संचरन्ती ।
छायया सुभगया हरिततृणसंवृतं
मेदिनीतलमिदं भूषयन्ती ॥ ४ ॥

कुञ्जगतवीरुधश्चलपलाशा इमा
लास्यमातन्वते लोचनहरम् ।
मारुतेनेरितेष्वेषु वृक्षेष्वपि
गीतमाकर्ण्यते कर्णमधुरम् ॥ ५ ॥

तरुषु हसदानना फलततिर्दृश्यते
   विकसितं राजते कुसुमजालम् ।
हसति सरिदावली तोयनिधिगामिनी
   मण्डयति मेदिनीकण्ठनालम् ॥ ६ ॥

दिनकरो निजकरैस्तुहिनपिहितां धरां
   स्पृशति पृष्ठे सुखस्पर्शमुदिताम् ।
वीचिमालाकुलं भासयति तज्जलं
   हरतु युष्माकमपि बुद्धिजडताम् ॥ ७ ॥

मुक्तासुवर्णसंवादः

मुक्ता—

रे रे काञ्चन कस्ते माहो
मया स्पर्धसे मूढमते ।
यशोधवलता क मामकीना
पित्तवर्णता क पुनस्ते ॥ १ ॥

सुवर्णम्—

मुक्ते मानिनि शुक्तिसुते ।
युक्तियुतं वचनं न हि ते ॥ १ ॥

गर्वमखर्वं वहासि वृथा ।
भासि यथा त्वं नासि तथा ॥ २ ॥

निजवर्णं किल वर्णयसे
स्वात्मश्लाघायां रमसे ॥ ३ ॥

सुवर्णमिति यद्भुवि गदितं
तत्त्वं मनुषे विपरीतम् ॥ ४ ॥

मुक्ता—

अहं सुवृत्ता सदा गुणवती
प्रणयभाजनं सर्वेषाम् ।
कठिनहृदयता विवेकरहिता
तवास्ति रुचये वद केषाम् ॥ १ ॥

सुवर्णम्—

सुवृत्तता ते गुणवत्ता
किंलाभा गुरुदोषयुता ॥ १ ॥

अन्तर्व्रणिता क्षयमयसे
श्वेतं कुष्ठं धारयसे ॥ २ ॥

काठिन्यं मम विभूषणं
तदभावस्तव विदूषणम् ॥ ३ ॥

किमपि घर्षणं यदि लभसे
स्वाङ्गभङ्गमुररीकुरुषे ॥ ४ ॥

घृष्टस्य तु मम सविशेषं
भजते शोभा परिपोषम् ॥ ५ ॥

प्रखरपावके यदि पतसि
भस्मशेषतामुपयासि ॥ ६ ॥

अनलसंगमाद्द्रवति परं
मदीयमङ्गं रुचिरतरम् ॥ ७ ॥

वपुषि मदीये न ताडनं
विकृतिं जनयति न भेदनम् ॥ ८ ॥

उभयमपीदं न तु सहसे
चूर्णीभावं प्रपद्यसे ॥ ९ ॥

मुक्ता—

स्थाने त्वां खलु गुणान्तरज्ञा
गुञ्जयैव तुलयन्ति जनाः ।
खनिजनुषस्तुच्छस्य संगतिं
न रोचयेऽहं तवाधुना ॥ १ ॥

श्रवणभूषणं कण्ठाभरणं
मौलिमण्डनं सुशोभनम् ।
किमिव मादृशं विलासिनीना—
मन्यन्नासालंकरणम् ॥ २ ॥

सुवर्णम्—

किं जनुषा च गुणेन च किं
बहुना ननु भणितेन च किम् ॥ १ ॥

उच्चैःपदमिह यच्छ्रयसे
मत्संगफलं तल्लभसे ॥ २ ॥

त्वच्छिद्रं पिदधामि यदा
प्रभवसि भूषाविधौ तदा ॥ ३ ॥

त्वं त्वमहमहं न त्वमहं
नाहं त्वं मा कुरु कलहम् ॥ ४ ॥

जीर्णं पादत्रं प्रति कृपणस्योक्तिः

मा याहि भद्रमुख मामिह संविहाय
दुःखं कथं बत वियोगभवं सहिष्ये ।
हा हन्त जर्जरतनुर्जरयासि जात—
स्तारुण्यभूररुणिमापि लयं गतस्ते ॥ १ ॥

मा मा मनागपि विषण्णमनाः सखे भू—
स्त्वां शक्तिहीनमपि नैव परित्यजेयम् ।
आधारतां मम गतोऽसि यदद्य यावत्
स्नेहोचितं त्वयि चिरं चरितं चरेयम् ॥ २ ॥

भ्रान्तं त्वया खलु मया सह तेषु तेषु
देशेषु भद्र सजनेष्वपि निर्जनेषु ।
नक्तंदिवं विचरतोऽपि शरीररक्षा
यत्नैस्त्वया मम कृता सहयायिनैव ॥ ३ ॥

भ्रातस्त्वयानवरतं चरता मदर्थे
रथ्योद्गता चरणधूलिरपि प्रजग्धा ।
आवर्जितं च मम मानसमङ्ग नित्यं
स्वाङ्गेषु घर्षणवशात्तनिमानमेत्य ॥ ४ ॥

ये नाम केचिदुपला अपि कण्टकाश्च
पादक्षतिं मम चिकीर्षव आविरासन् ।
तैर्निष्ठुरं विरचिताः परुषाः प्रहाराः
सोढा मदाङ्घ्रिकवचेन सखे त्वयैव ॥ ५ ॥

तैस्तैर्मदीयरिपुभिः कृतविग्रहस्त्वं
यद्धोः सखे मम कृते क्षतविग्रहोऽभूः ।
आर्तं तदात्मनिरपेक्षतयाभिरक्षन्
क्षत्रोऽसि मूर्त इति निश्चिनुते मतिर्मे ॥ ६ ॥

अङ्गं त्वदीयमपमृज्य मया करेण
धूलिप्रदिग्धमपि निर्मलतामनायि ।
छिद्रान्वितानि पिहितानि तथा क्षतानि
दत्त्वा मुहुर्व्रणविरोपणपट्टिकास्ते ॥ ७ ॥

नो केवलं चरणयोः करयोरपि त्वां
बिभ्रद्दयाकुलतया बहुशोऽहमाटम् ।
जाने गुणी गुणवता घृणिना घृणावान्
सेव्येन सेवकजनोऽपि हि सेवनीयः ॥ ८ ॥

हा हन्त हन्त जनिता तव चर्मकारो
जात्याधमो मलिनकर्मपरायणश्च ।
स्नेहान्वितः खलु भवांस्तु तथा सुरक्त
इत्येव भोः प्रणयभाजनतां गतो मे ॥ ९ ॥

नैसर्गिकी सुदृढता क्व नु ते प्रयाता
किं सांप्रतं शिथिलतां भजसीदृशीं भोः ।
एतद्वदन्ति महतां तु कुलव्रतं यत्
प्राणात्ययेऽपि विकृतिं प्रकृतिर्न याति ॥ १० ॥

संघट्टने सुचिरमेव तवानुभूय
मत्पादपद्मयुगलस्य गता त्वचापि
एवं गतेऽपि तु वहंस्तव देहभारं
मन्ये कृतार्थमभवन्मम जन्म लोके ॥ ११ ॥

वार्द्धक्यदोषजनितव्यसनाभिभूतं
त्वां विस्मरेयमथवा यदि संत्यजेयम् ।
तन्मां कृतघ्न इति सर्वजना वदेयु-
र्मा भूत्त्वया मम कदापि सखे वियोगः ॥१२॥

स्पृष्ट्वा त्वदङ्गमसकृत्परमादरेण
त्वत्प्रत्ययार्थमधुनैवमहं शपामि ।
रक्षाविधौ तव तनोर्न मनागपि स्यां
मन्दादरो यदि न विघ्नकरोऽन्तकः स्यात् १३



गगनं प्रति

—:o:—

अहनि भास्वरतां रजनीमुखे
वहसि लोहिततां निशि कृष्णताम् ।
अहह सत्त्वरजस्तमसां पदं
त्वमसि शून्यमपि स्वयमम्बर ॥ १ ॥

सूर्यं च चन्द्रं च तथेतराणि
ज्योतींषि देवांश्च विभर्षि पृष्ठे ।
तथापि चित्रं न नभो जहासि
यदान्ध्यमन्तर्गतमात्मनस्त्वम् ॥ २ ॥

नादिं न मध्यं न तथावसानं
जानाति ते व्योम भुवीह कोऽपि ।
तवोदरे माति जगच्च सर्वं
तत्त्वं कथं शून्यमसीति चित्रम् ॥ ३ ॥

त्वत्तो नभस्वान् नभः उद्गतोऽभू-
न्नभस्वतोऽग्निः किल संप्रवृत्तः ।
अग्नेर्जलं भूर्जलतः प्रजाता
त्वं कारणं सर्गपरम्परायाः ॥ ४ ॥

संक्षोभमायान्ति यदा कदाचिद्
वाय्वादिभूतानि नियम्य सम्यक् ।
सुखाय भोः स्थावरजङ्गमाना-
मनारतं योजयितुं प्रसीद ॥ ५ ॥

स्त्रीपुरुषौ

—:o:—

मन्ये कृतौ संस्कृतिवाङ्मयस्य
  भागौ विधात्रा गुणतो विविच्य ।
स्वारस्ययुक्ता कविता किल स्त्री
  पारुष्ययुक्तः पुरुषश्च गद्यम् ॥ १ ॥

इयं संस्कृतिर्नाम कन्था विचित्रा
  पटैः कल्पिता हर्षशोकादिरूपैः ।
पुमान् सीवने सूत्रमस्या व्यधायि
  तदाकर्षणं कुर्वती स्त्री च सूची ॥ २ ॥

कलं कोकिलानां रुतं न श्रुतं चेद्
  वसन्तः सुरम्योऽपि तोषाय केषाम् ।
न चेन्मदिरे मञ्जुवागङ्गनानां
  श्रुतिं रञ्जयेत्कात्र पुंसां रतिः स्यात् ॥ ३ ॥

उपवनं रमणीयमिदं जग-
  न्नरवरास्तरवः सुमनोहराः ।
पतनभीरुतया विटपाश्रिताः
  कुसुमगन्धयुता वनिता लताः ॥ ४ ॥

नर्तनं पुरुषचेष्टितं मतं
  गायनं च ललनाविचेष्टितम् ।
रङ्गभूमिमवनीं विशोभयं-
  श्चारुतां वहति योग एतयोः ॥ ५ ॥

विबुधसद्मनि नास्त्यपरा सुधा
न विषमन्यदिहेति मतिर्मम ।
उभयधर्मयुता हि नितम्बिनी
भवति सङ्गवियोगवशान्नु किम् ॥ ६ ॥

महार्हरत्नं गुणवत्कलत्रं
न मन्दिरे यस्य विभाति पुंसः ।
श्रियोऽपि नन्दन्ति न तस्य गेहे
तमोमये पातकशङ्कयेव ॥ ७ ॥

समुदितोऽपि विधुर्विधुरो दिवा
प्रमुदितो निशया यदि संगतः ।
उदयवानपि यः श्रयते स्त्रियं
गुणवतीं स हि धन्यतमः पुमान् ॥ ८ ॥

स्नेहान्विता अपि दशारहिताः प्रदीपा
विध्वंसनाय तमसां न समुज्ज्वलन्ति ।
कार्यक्षमा अपि नरा रमणीविहीनाः
संसारघोरतिमिरं नु कथं तरेयुः ॥ ९ ॥

गुण्यां गुणकवद्भार्यां न सेवेत पुमान् यदि ।
समीहितफलावाप्तिः कथमस्य तदा भवेत् ॥ १० ॥

गुरुतरगृहकार्योद्वाहने नित्यदक्षं
सचिवमिह न विन्देद्देहिनीं प्रेयसीं यः ।
विपिनसदृशगेहे प्राणयात्रापरस्य
कथमिव सुखलेशस्तस्य जायेत पुंसः ॥ ११ ॥

सीतादर्शनम्

दशकण्ठनीतायाः सीतायाः पदमन्वेष्टुमहमहमिकया बद्धपरिकरा अपि वलीमुखा अपारपारत्वादकूपारस्य तदुल्लङ्घनाक्षममात्मानं मन्यमानाः श्लथोद्यमा अभूवन् । हनूमांस्तु जाम्बवद्वचनप्रोत्साहित 'एषोऽहमाहरामि लङ्कां ससीतां च सरावणां च समुत्पाट्य' इति गर्जन् पयोधिमुल्लिलङ्घयिषुर्महेन्द्रशैलस्य प्रस्थादुत्पत्य, श्रीमद्दाशरथिसायक इव स्वयमव्याहतगतिर्विदारयन्निव परदारचौरस्य दशाननस्यावकाशदायिनमाकाशं, स्ववेगाकृष्टैरनुव्रजद्भिर्बन्धुभिरिव जीमूतवृन्दैरनुगम्यमानोऽस्ताचलचूडावलम्बिनि मरीचिमालिनि सिन्धोर्दक्षिणं तीरमासाद्य गगनतलात् कुसुमवृष्टिं वितन्वानं विबुधगणं विस्मयानन्दनिस्पन्दं विदधल्लम्बारण्यगिरेर्विशाले तटे समवातरत् ।

तत्र समन्ताद्विचरद्भिरुग्रधन्वभी राक्षसैः सुरक्षितां, हेमप्राकारैरभिवेष्टिताम्, अट्टालकशतैराकीर्णां, परिखाभिरलंकृतां, रावणराजधानीं लङ्कां निरीक्षमाणस्य तस्य चेतस्येवमुदभूत् । नूनमिममन्तरायभूतमुदन्वन्तं तरीतुं न पारयेयुर्हरयः । इहागतानामपि तेषां सर्वथा निष्फला भविष्यन्ति मनोरथाः । न ह्रीयं नगरी सुरैरपि जेतुं शक्या । मयापि नेयमनेनैव रूपेण प्रवेष्टुं शक्यते । वायुरप्यत्र नाज्ञातश्चरेदिति मे मतिः । तन्मा मे प्राणविपत्तिर्भर्तुश्चार्थहानिर्जायतामिति रात्रावेव ह्रस्वतामुररीकृत्य नगरान्तः प्रवेक्ष्यामि परिज्ञास्यामि च जानकी जीवति वा न वेति ।

एवं विचिन्तयति हनूमति भगवान् भास्करः क्षपाचरपुरीरत्नमन्दिरमरीचिभिस्तिरस्कृत इवास्तं जगाम । कालविन्मारुतिरपि संक्षिप्त-

वपुर्लङ्कामद्वारेणैव प्रविविक्षुः शत्रोः शिरसीव तत्र यावत् प्रथमतः सव्यं चरणं निदधाति तावदेव रजनिनाथोऽपि साचिव्यमिवास्य कुर्वन् ज्योत्स्नावितानेन समस्तं लोकमावृण्वानः सरसि पोप्लूयमानो हंस इव नभसि विरराज ।

तदनु प्राभञ्जनिर्मैथिल्यन्वेषणाय भवनाद्भवनं व्रजन् क्रमेण रावणालयं प्रविष्टस्तत्र निद्रासुखं निर्विशन्तीषु तरुणीषु क्वचिदपि सीतालक्षणमनभिलक्षयन् पर्याकुलमतिर्व्यचिन्तयत्। ननु दृष्टं मयास्य रक्षसः पुरमशेषं विशेषतस्त्वन्तःपुरम् । न पुनरवलोकिता साध्वी सीतादेवी । किमियं रावणेन ह्रियमाणैव सागरे पतिता, उतानेनाननुकूलेति भक्षिता, उताहो निर्बन्धेनास्य निर्विण्णा स्वयमेव जीवितं परित्यक्तवती, आहोस्वित्स्वजनसमागमप्रतीक्षया परितप्यमानान्यत्रैव क्वापि तिष्ठतीति ।

एवं वितर्कयतस्तस्य शुभैर्निमित्तैः सममक्षिगोचरतामवापाशोकवनं नाम प्रमदोद्यानम् । तदात्रैवार्यया भवितव्यमिति मत्वा हनूमांस्तदन्वेषणाय तामशोकवनिकां प्रविवेश । तस्यां च नैकानोकहैः परिवृतायां तत इतः परिभ्रमन्नभ्रंलिहाभिः शाखाभिरुपलक्षितां कांचन शिंशपामारुरोह । ततश्च सर्वासु दिक्षु चक्षुर्विनिक्षिपंस्तस्यैव पादपस्य नातिदूरे कामपि वरवर्णिनीमवालोकयत् । तदात्व एव तस्य चेतस्येवमुदभूत् ।

केयमत्र तरुणी तरुमूले
भीतिलोलनयना विलपन्ती ।
राक्षसीपरिवृताप्यसहाया
चेतसा किमपि चिन्तयतीव ॥ १ ॥

धूमस्य जालेन यथा पिनद्धा
विभावसोर्नैव शिखा विभाति ।
तथातिशोकेन समवृतत्वा—
न्न राजतीयं विनिगूढतेजाः ॥ २ ॥

प्रक्षीणपुण्या किमु तारकेयं
च्युताम्बरादत्र विधेर्नियोगात् ।
अलं न लङ्कापतिना निरुद्धा
पदं स्वकीयं पुनरप्यवाप्तुम् ॥ ३ ॥

कालमेघपिहितां शशिप्रभां
पुष्पपल्लवविवर्जितां लताम्
पश्यतो मम न दूयते मनो
बाष्पपूर्णनयनामिमां यथा ॥ ४ ॥

यथा रूपशोभादिचिह्नानि राम—
स्तदावर्णयन्मे विदेहात्मजायाः ।
तथा तानि सर्वाणि वीक्षे यदस्या—
मियं सैव रामेति धीर्निश्चिता मे ॥ ५ ॥

उपवासकृशा तपस्विनीयं
मलिना खिन्नमना धृतैकवेणिः ।
श्वसती विरहातुरा विभाति
दशकण्ठेन हृतैव रामपत्नी ॥ ६ ॥

इयं सा यत्कृते रामश्चतुर्भिरिह तप्यते ।
कारुण्येनानृशंस्येन शोकेन मदनेन च ॥ ७ ॥

[वा. रा. सु. १९-४९]

स्त्री प्रनष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः ।
पत्नी नष्टेति शोकेन प्रियेति मदनेन च ॥ ८ ॥

[वा. रा. सु. १५-५०]

अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् ।
तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ॥ ९ ॥

[वा. रा. सु. १५-५२]

तुल्यशीलवयोयुक्तां तुल्याभिजनलक्षणाम् ।
राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा ॥ १० ॥

[वा. रा. सु. १६-५]

यदि रामः समुद्रान्तां मेदिनीं परिवर्तयेत्
अस्याः कृते जगच्चापि युक्तमित्येव मे मतिः ॥११॥

[वा. रा. सु. १६-१३]

राज्यं वा त्रिषु लोकेषु सीता वा जनकात्मजा ।
त्रैलोक्यराज्यं सकलं सीताया नाप्नुयात्कलाम् १२

[वा. रा. सु. १६-१४]

क्षितिक्षमा पुष्करसंनिभेक्षणा
या रक्षिता राघवलक्ष्मणाभ्याम् ।
सा राक्षसीभिर्विकृतेक्षणाभिः
संरक्ष्यते संप्रति वृक्षमूले ॥ १३ ॥

[वा. रा. सु. १६-२९]

हिमहतनलिनीव नष्टशोभा
    व्यसनरम्परया निपीड्यमाना ।
सहचररहितेव चक्रवाकी
    जनकसुता कृपणां दशां प्रपन्ना ॥ १४ ॥

[वा. रा. सु. १६-३०]

इति चिन्तयतो हनूमतः
    सुचिराभीप्सितलाभहर्षिणः ।
प्रभुकार्यविलम्बजा व्यथा
    तनुभावं निशया सहागमत् ॥ १५ ॥

सीतारावणसंवादः

—:o:—

अथ प्रत्यासन्ने निशावसानसमये दशकण्ठः कन्दर्पसर्पेण दष्ट इव सहसा व्यबुध्यत तद्विषबाधां च शिशमयिषुः ससंभ्रमोपस्थिताभिर्नैकवरस्त्रीभिः परिवृतस्तत्करतलकलिताभिर्दीपिकासंमार्जिनीभिर्दिशि दिशि परिमृष्टं समस्तमपि तमःस्तोमं स्वहृदये संचिन्वन्निव मन्दाञ्चितगतिरशोकवनिकां प्रविवेश । मारुतिस्तु निबिडपत्रशाखायां लीनोऽपि कान्ताकङ्कणनिःस्वनेन ताररशनानूपुरारावेण च दूरादेव श्रुतिपथमागतेन समुपसर्पन्तं रावणं स्फुटमभिलक्षयंस्तत्तेजसा निर्धूत इव तद्व्यवसायं परिजिज्ञासुः समधिकमेव संवृतमात्मानमकरोत् ।

विलोक्य तं रावणमुग्ररूप-
 मुपस्थितं भूषणभूषिताङ्गम् ।
भयाकुलावेपत कोमलाङ्गी
 सीता प्रवाते कदली यथैव ॥ १ ॥

ऊरुद्वयेनोदरमायताक्षी
 पयोधरौ बाहुलतायुगेन ।
आच्छाद्य सा संकुचिताङ्गयष्टि-
 रुदश्रुनेत्रा भुवि जोषमास्त ॥ २ ॥

सन्नार्णवे नौरिव दीनरूपा
 द्रुमस्य शाखा पतितेव भूमौ ।
सा मण्डनार्हा मलरूषिताङ्गी
 रेजे मृणालीव न पङ्कदिग्धा ॥ ३ ॥

स्थितापि दूरे वपुषा सुकेशी
मनोरथैः पार्श्वगतेव पत्युः ।
कामात्मना कालवशंवदेन
धृष्टेन लङ्कापतिनैवमूचे ॥ ४ ॥

अद्यापि वामनयने किमिवासि वामा
कामाकुलं भजसि मां न कथं सकामा ।
रामाधिकोऽस्मि यशसा विभवेन कान्त्या
शक्त्या गुणैर्बहुविधैश्च मनोऽभिरामैः ॥ ५ ॥

तव मूर्तिमिमां सुशोभनां
सुतरां धीरमनःप्रमाथिनीम् ।
त्रिजगज्जयिनो मनोभुवो
ननु शक्तिं कलये शरीरिणीम् ॥ ६ ॥

अपगच्छति यौवनं नवं ते
यदतीतं पुनरेति नैव सीते ।
अत एव वरोरु मां युवानं
बहुमानादुपसृत्य भुङ्क्ष्व भोगान् ॥ ७ ॥

न हि नह्युचिता तवैकवेणी
वसनं ते मलिनं च नैव योग्यम् ।
कृशता नियमैरियं किमर्थं
मयि ते पाणिमभीप्सतीह सीते ॥ ८ ॥

कुरु मे वचनं विसृज्य मोहं
प्रणयादेव हिताय ते ब्रवीमि ।
भज मैथिलि मां स्वभर्तृबुद्ध्या
त्यज शोकं महिषीपदं लभस्व ॥ ९ ॥

स्तनयुगमुदरं च गूहमाना
किमिति भयादिव दर्शनं न यासि ।
न हि परपुरुषोऽत्र भीरु कोऽपि
मदभिगमे त्यज दोषलेशशङ्काम् ॥ १० ॥

शशिमुखि सुकुमारि कामये त्वां
मनसिशयं सफलीकुरुष्व मेऽद्य ।
स्वयमभिगमनं करोषि नो चेद्
विरसतया हरणे कथं सुखी स्याम् ॥ ११ ॥

तनुस्त्वदीया तव तन्वि नेयं
संभोगहीना नितरां चकास्ति ।
गुणान्तरज्ञै रसिकाग्रगण्यै-
रसेविता सत्कविभारतीव ॥ १२ ॥

न भाति सेना सुभटेन हीना
निशा विहीना शशिना न भाति ।
त्यागेन हीना न विभाति लक्ष्मी-
र्भोगेन हीना न तथा तनुस्ते ॥ १३ ॥

त्वां वीक्ष्य वाले रतितुल्यरूपां
न स्वेषु दारेषु रतिं लभेऽहम् ।
शिलीमुखः कल्पलतामवाप्य
कथं रमेतेतरवल्लरीषु ॥ १४ ॥

भव प्रसन्ना कुरु चारु हासं
ललोपविष्टा सविलासमङ्के ।
पिवासवं स्वादुरसं वरोरु
दास्यामि सर्वस्वमपीह तेऽद्य ॥ १५ ॥

दशाननमुखोद्गतं श्रुतिकठोरमेतद्वचो
निशम्य जनकात्मजा प्रतिजगाद लज्जाकुला ।
विधाय तृणमन्तरे नयनवारिविन्दुस्रवैः
प्रमन्युपरितापितां स्वजननीं मही सिञ्चती ॥१६

खल मामवलां प्रवाधसे
प्रवलोऽस्मीति वृथा विकत्थसे ।
कपटैः परदारधर्षणं
वद किं वीरवरस्य लक्षणम् ॥ १७ ॥

कुलजां किल भर्तृजीवितां
कथमाख्यासि हरन् कुलीनताम् ।
श्रुतिसंमतमार्गदूषणं
वद किं धर्मरतस्य भूषणम् ॥ १८ ॥

परदारसमागमैषिणा—
मनुरक्तात्मवधूविमानिनाम् ।
पुरुषोत्तमसक्तमानसा
सदने श्रीर्नु कथं निवत्स्यति ॥ १९ ॥

विनयादिगुणैर्विवर्जिता
गतलज्जा अजितेन्द्रियाश्च ये ।
उपयन्ति समागमोत्सुका
विपदस्तान् कुलटा इव स्वयम् ॥ २० ॥

यदि पतिर्न भवेद्विभवेन किं
यदि भवेत्तु ततोऽपि च तेन किम् ।
वमनतुल्यमवैम्यखिलं धनं
रघुपतिः पतिरेव परं धनम्॥ २१ ॥

न सन्ति सन्तस्तत्र संनिधौ किं
सन्तोऽपि वा किं न हितं वदन्ति ।
वचः प्रमाणं वदताममीषां
नाशाभिलाषी मनुषे न किं वा ॥ २२ ॥

रक्ष्या यथा ते निजधर्मपत्नी
तथैव सा किं न परस्य रक्ष्या ।
आत्मानमेवात्र निदर्शनत्वं
नयन् स्वदारेषु रमस्व मूढ ॥ २३ ॥

पत्युः परोक्षेऽप्युटजाद्धरन्मां
किं शूरतामात्मगतां प्रवक्षि ।
व्याघ्रस्य लाङ्गूलमुपांशु कर्ष-
स्तुल्यो भवेत्तेन कदापि किं श्वा २४ ॥

अनार्य निर्लज्ज नृशंस नीच
निरीक्षमाणस्य मदङ्गकानि ।
काले कराले करवालतुल्ये
कथं नु नेत्रे पतिते क्षितौ ते ॥ २५ ॥

रे पाप मां वीरवरस्य पत्नीं
स्नुषां क्षितीशस्य च सत्यवाचः ।
चाटूक्तिभिर्व्याहरतो विशङ्कं
जिह्वा कथं ते शतधा न दीर्णा ॥ २६ ॥

शौर्यं किमेतद्बलशालिनस्ते
कर्माभिजातं कुलजस्य किं वा
महात्मनो वा किमुदारतेयं
कृतं त्वया यत्परदारचौर्यम् ॥ २७ ॥

आशु दाशरथिरम्भसां निधेः
पारमेत्य नियतं शरीरतः ।
उद्धरिष्यति शरैरसूंस्तव
तोयमल्पमिव भास्करः करैः ॥ २८ ॥

दुष्टदण्डनगृहीतधन्वना
राघवेण सजवं विसर्जितः
सायकः समभिपत्य राक्षसान्
पन्नगाशन इवोरगान् हरेत् ॥ २९ ॥


राघवस्य धनुषः स्वनो महान्
कर्णयोः पथि यदा पतिष्यति ।
दर्पमोहरहितो भयान्वितो
राक्षसाधम तदानुतप्स्यसे ॥ ३० ॥

सर्वमेव जगतीतलं यदा
रामसायकमयं भविष्यति ।
स्वानसूनिषुभयाद्रिरक्षिषुः
कां दिशं खल तदा गमिष्यसि ॥ ३१ ॥

तव रावण चेज्जिजीविषा
ननु रामं प्रति मां विसर्जय ।
रिपुसंहरणे सुदारुणः
करुणार्द्रः शरणागते हि सः ॥ ३२ ॥

श्रुतिपरुषमपीदं सीतावचनमाकर्ण्य रावणः किंचिदिव ह्रीपरिगतो मनसि व्यचिन्तयत् । नूनमियमङ्गना विप्रियकारिणी सद्य एव वधार्हाप्यद्य मया रक्ष्यत एव । अस्यां हि प्रसर्पन् मे मनोभवो न केवलं प्रशान्तामर्षं किन्तु सानुक्रोशं च सस्नेहं च दाक्षिण्यवन्तं च मां विदधाति । अहो वामता कामस्य यदन्यकामास्वपि विमुखीष्वपि रुचिरुपजायते वामनयनासु पुरुषाणाम् । न हि नियमेन सकामान् कामि-

न्यः कामयन्ते । न ह्यभिकामैः प्रसादिता अपि प्रसन्ना भवन्ति । प्रत्युतावमानिता अपि वश्यतां यान्ति । अनुकूलस्यापि विरुद्धा भवन्ति । प्रतिकूले च महतीं प्रीतिं कुर्वते । एवं कुटिलचारिणीष्वङ्गनासु परुषं वदन्तीष्वपि प्रणयभाजो भवन्ति कामिन इत्यहो विचित्रा गतिर्मन्मथस्य । तद्भवतु । मासद्वयं प्रतीक्ष्य ज्ञास्यामि किमियमेवमेवाननुकूला भवति शनैर्वा प्रसाद्यमानानुनयं गृह्णातीति । एवं संप्रधार्य रावणः ‘ सर्वैरुपायैरेनां वशीकर्तुं प्रयतध्वम् ’ इति राक्षसीरादिदेश स्वयं च पुनरप्यन्तःपुरं प्रविवेश ।



सीतासमाश्वासनम्

अथ निष्क्रान्ते रावणे भीमरूपाभी राक्षसीभिर्भर्त्सिता च भीषिता च तर्जिता च सीता नेत्रवारिस्त्रवैः स्तनयुगलं स्नपयन्ती बहुविधं विललाप । अत्रान्तरे त्रिजटा नाम काचिन्निशाचरी ज्यायसी वयसा च गुणेन च, जन्मना राक्षस्यपि कर्मणा देवतेव नित्यमेव सीतायाः प्रियहितैषिणी शयनादुत्थिता शुभस्वप्नसंकीर्तनेन तामाश्वासयामास

तथागतां तां व्यथितामनिन्दितां
व्यतीतहर्षां परिदीनमानसाम् ।
शुभां निमित्तानि शुभानि भेजिरे
नरं श्रिया जुष्टमिवोपसेविनः ॥ १ ॥

[वा. रा. सु. २९–१]

तस्याः शुभं वाममरालपक्ष्म–
राज्यावृतं कृष्णविशालशुक्लम् ।
प्रास्पन्दतैकं नयनं सुकेश्या
मीनाहतं पद्ममिवाभिताम्रम् ॥ २ ॥

[वा. रा. सु. २९–२]

एवमादिभिर्निमित्तैः संचोदिता सीता वातातपक्लान्तं बीजं वर्षेणेव प्रतिसंजहर्ष ।

हनूमानपि विटपान्तरितविग्रहः सकलमपीदं वृत्तं दृष्टवान् ‘ नेयमिदानीमुपेक्षणीया तपस्विनी ’ इति विचिन्तयन् नेदीयानस्या भूत्वा

मधुरगभीरेण स्वरेण रामकथामादितः प्रभृति स्वागमनान्त समासतः कथयामास ।

देव्या दशाननवचोमयवज्रदीर्ण-
कर्णान्तरव्रणविरोपणभेषजानि ।
विस्रम्भणार्थमयमन्वयसंगतानि
रामाभिकीर्तनमधूनि शनैर्न्यषिञ्चत् ॥

[चम्पूरा. सु. २६]

सीतापि तद्रामकथामृतं कर्णपुटाभ्यामापीय परं विस्मयमापन्ना सर्वासु दिक्षु चक्षुर्विक्षिपन्ती यावदूर्ध्वमैक्षत तावदेव तन्नयनगोचर-तामगाच्छिंशपाशाखान्तरे लीनो विद्युत्पिङ्गलः परिहितार्जुनवसनो विनीतवदवस्थितः प्रियवादी शाखामृगः । तदा सा ' मायावी रावणोऽयं वानररूपधरः पुनरपि मां कदर्थयितुमायातः ' इति चिन्तयन्त्यधोवदनावतस्थे । किन्तु तदात्व एव तदुदीरितैः श्रोत्रानुकूलैर्वचनैः समाश्वासिता तद्दर्शनेनैव मनसः प्रीतिरुत्पन्नेति संजातविश्रम्भा ' कस्त्वं भद्र कुत आयातोऽसि ' इति पर्यप्राक्षीत् ।

अथ द्रुमाद्विद्रुमसंनिभाधरो
विनीतवेषः कृपणोऽवतीर्य सः ।
उपेत्य चैनामवदत् कृताञ्जलिः
सुतः सवित्रीमिव मारुतात्मजः ॥ १ ॥

विद्धि मां रघुपतेः प्रियदूतं
लक्ष्मणाग्रजनुषो निजभर्तुः ।
मन्मुखेन कुशली कुशलं त्वां
प्रोषितां स परिपृच्छति कान्ताम् ॥ २ ॥

राघवस्य किल जीविताधिको
   यः सदानुचरतां गतो वने ।
लक्ष्मणः स बहुशोकपीडित-
   स्त्वां नतेन शिरसाभिवन्दते ॥ ३ ॥

यः सखा रघुपतेरभून्नवो
   वानराधिप उदग्रविक्रमः ।
यस्य मां सचिवमीक्षसे पुरः
   पृच्छ्यसे सुतनु तेन कौशलम् ॥ ४ ॥

छद्मनैव किल रक्षसा हृतां
   त्वां प्रियां सहचरीमलोकयन् ।
काननेषु सुमनोहरेष्वपि
   संचरन्न रतिमेति ते पतिः ॥ ५ ॥

त्वां स्मरंस्तव च नाम कीर्तयन्
   राघवो विरहदीर्घवासरान्
देवि यापयति शोकपीडितो
   भाविसंगमसुखप्रतीक्षया ॥ ६ ॥

धेहि धैर्यमयि मातरन्तरे
   मा शुचो वशमतः परं गमः ।
क्षिप्रमेव सहमित्रबान्धवं
   रावणं रघुपतिर्हनिष्यति ॥ ७ ॥

निहते राक्षसेन्द्रे च सपुत्रमात्यबान्धवे
त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ॥ ८ ॥

[वा. रा. सु. ३९—४९]

एवमभिहितया सीतया सादरमनुयुक्तो मारुतिर्निखिलमपि रामवृत्तान्तं तस्यै विनिवेद्य तत्प्रत्ययार्थं रामनामाङ्कितमङ्गुलीयकं समर्पयामास । सापि तदादाय प्रहृष्टमानसा भर्तारमेव समागतं मन्वाना 'अयि कान्त कथं मद्विरहासहिष्णुतया सागरमतीत्य संप्राप्तोऽसि ' इति संजल्पन्ती, स्तनतटेन दृढमालिङ्गन्ती, मुखेन मुहुश्चुम्बन्ती, प्रमदाम्बुभरेण च स्नपयन्ती सुचिरं लालयते स ।

तच्चारु तस्या वदनं मृगाक्ष्या
आनन्दबाष्पाकुलितं तदानीम्
राहोर्मुखान्निष्पातितस्य नूनं
जहार शोभां शशलाञ्छनस्य ॥ १ ॥

वातात्मजं तं दयितस्य दूतं
संभाव्य सस्नेहविलोकितैः सा ।
तुष्टाव वार्ताश्रवणेन हृष्टा
तुष्टाङ्गुलीयस्य च दर्शनेन ॥ २ ॥

कच्चिन्न नाथो व्यथते वनान्ते
कच्चिन्न कार्येषु विमूढचेताः ।
कच्चिद्विवासान्मयि नो विरक्तः
सोत्कण्ठमित्यादि तमन्वयुङ्क्त ॥ ३ ॥

कुर्वन् सशोकामथ वीतशोका—
माश्वासयन्निःश्वसतीं च दीर्घम् ।
स रामदूतोऽपि वचोऽभिरामं
प्रणामपूर्वं निजगाद रामाम् ॥ ४ ॥

अतीव रामो व्यथते त्वदर्थे
शोकाकुलश्चिन्तयते च नान्यत् ।
सर्वेषु भोगेषु गतो विरामं
स्नेहोऽस्य रामे त्वयि वृद्धिमेति ॥ ५ ॥

प्रायेण निद्रा न तमभ्युपैति
वशं गतोऽस्या यदि वा कथंचित् ।
सीतेति वाणीं मधुरां मुखेन
वदंस्तदाशु प्रतिबुध्यतेऽसौ ॥ ६ ॥

न त्वामिहस्थां तव वेत्ति नाथो
नातोऽसि नीता सदयेन तेन ।
ज्ञात्वा तु मत्तस्त्वदुदन्तमाशु
शचीं विडौजा इव नेष्यति त्वाम् ॥ ७ ॥

सेनां स कर्षन् महतीं हरीणां
प्रस्थास्यते शत्रुवधाय शीघ्रम् ।
संस्तभ्य सिन्धुं च शरैरमोघैः
संरोत्स्यते रावणराजधानीम् ॥ ८ ॥

तदाननं वल्गु सुचारुकुण्डलं
सुनासिकं विद्रुमसंनिभाधरम् ।
सलोचनं द्रक्ष्यसि देवि सत्वरं
मनोहरं पूर्णमिवेन्दुमण्डलम् ॥ ९ ॥

ऐति राम इति हृष्टमानसा
शोकदीन इति शोकलालसा ।
वायुसूनुवचसामुना बभौ
साभ्रचन्द्ररजनीव जानकी ॥ १० ॥

तदनु "का मे नाथस्य विरहावस्था, नाद्यापि तृप्तौ मे कर्णौ तद्वचनान्याकर्णयन्त्याः, तत्पायय मां पुनरपि वागमृतम्" इति सीतया सोत्कण्ठमभिहितो हनूमानिमं रामसन्देशं तां श्रावयामास ।

हिमांशुश्चण्डांशुर्नवजलधरो दावदहनः
सरिद्वीचीवातः कुपितफणिनिश्वासपवनः ।
नवा मल्ली भल्ली कुवलयवनं कुन्तगहनं
मम त्वद्विश्लेषात् सुमुखि विपरीतं जगदिदम् ॥ १ ॥

[प्रसन्नराघवः अङ्कः ६]

अपि च ।

कस्याख्याय व्यतिकरमिमं मुक्तदुःखो भवेयं
को जानीते निभृतमुभयोरावयोः स्नेहभारम् ।
जानात्येकं शशधरमुखि प्रेमतत्त्वं मनो मे
त्वामेवैतच्चिरमनुगतं तत्प्रिये किं करोमि ॥ २ ॥

[प्रसन्नरा. अङ्कः ६]

इमं रामसन्देशमाकर्ण्य सीता हनूमन्तमवादीत् ।

"त्वदनन्यमना रघूत्तमो
बहुशोकव्यसनेन मूर्च्छितः"
इति वानर यद्ब्रवीपि मां
विषसंपृक्तमिवामृतं हि तत् ॥ १ ॥

धर्मस्य हेतोस्त्यजतः स्वराज्यं
मां चाप्यरण्यं नयतः पदातेः ।
शोकेन भीत्या च पदं न यस्य
चित्ते कृतं सोऽत्र धृतिं न मुञ्चेत् ॥ २ ॥

एवं ब्रूयाः सौम्य मे जीवितेशं
मासादूर्ध्वं जीवितुं नास्मि शक्ता ।
तस्मात्तेऽहं नाथ नोपेक्षणीया
मूलं मा भूदापदः कालसङ्गः ॥ ३ ॥

शूर्पणखाविरूपणम्

—:o:—

कदाचिद्दाशरथिः सीतया सह विविधाः कथाः कुर्वन् पर्णशालायां समुपविष्ट आसीत् । तदा तत्र सहसैव प्रादुरास काचिन्निशाचरी शूर्पणखा नाम ।

तत्र स्थितं दूरत आपतन्ती
घोरस्वना कोमलमञ्जुवाचम् ।
विरूपनेत्रा सरसीरुहाक्षं
सा दुर्मुखी तं सुमुखं ददर्श ॥ १ ॥

तल्लोचनासेचनकं तदीयं
सौन्दर्यमालोक्य निशाचरी सा ।
कामस्य विद्धा हृदि सायकेन
स्वमायया चारु दधार रूपम् ॥ २ ॥

मुखं दधाना विधुविम्बशोभं
कुचद्वयं काञ्चनकुम्भशोभि ।
करीन्द्रहस्तोपममूरुयुग्मं
विद्युद्विलासं सकलं वपुश्च ॥ ३ ॥

चारुस्मितालंकृतविद्रुमोष्ठी
कटाक्षपाशेन मनो हरन्ती ।
पदानि मन्दानि भुवि क्षिपन्ती
समाययौ दाशरथेः समीपम् ॥ ४ ॥

" शुभाङ्गि कासीह किमागतासि
कथं चरन्ती न वने बिभेषि " ।
इत्यादि पृष्टा रघुनायकेन
कामातुरा वाचमिमामुवाच ॥ ५ ॥

अहं सुता विश्रवसो महर्षे-
र्महाबला शूर्पणखाभिधाना ।
निजप्रभावेण च कामरूपा
भ्रमाम्यहं स्वैरगतिस्त्रिलोक्याम् ॥ ६ ॥

ममाग्रजो रावणनामधेयो
लङ्कापतिः ख्यातभुजप्रतापः ।
अन्येऽपि मे भ्रातर उग्रवीर्याः
खरादयो लोकभयंकराश्च ॥ ७ ॥

हा हा पतिर्मे नियतेर्निदेशात्
परेतभावं गतवान् पुरैव ।
अतो विषण्णा विचरामि लोके
पतिंवरा मन्मथबाणविद्धा ॥ ८ ॥

मया भ्रमन्त्या भुवि तेषु तेषु
देशेषु दृष्टाः पुरुषाः प्रभूताः ।
अनाप्नुवत्यास्तु मनोऽनुकूलं
दृशोर्महाभाग पथि स्थितोऽसि ॥ ९ ॥

नदास्तडागा विपुलाम्बुसंकुला
भवन्ति कूपा अपि मेदिनीतले ।
तथापि कालाम्बुदमप्रपद्य किं
तृषातुरा प्रीतिमुपैति चातकी ॥ १० ॥

दृशोः किरन्तीममृतस्य धारां
विलोकयन्ती तव रूपशोभाम् ।
मनोभुवाहं तव संनिकृष्टं
संप्रेषिता भाग्यवशादिदानीम् ॥ ११ ॥

य ऊढपूर्वां रतिसारकोविदां
वधूं वरो विन्दति दारसंगतः ।
स एव धन्यो न तु यः स्वयं नवो
नवामलब्धानुभवां समश्नुते ॥ १२ ॥

तदावयोः संगतमत्र कानने
गुणाय कल्पेत महीयसेऽधुना ।
इमां वधूं संप्रविहाय मानुषीं
रमस्व लोकोत्तरया मया सह ॥ १३ ॥

वृथा वने भ्राम्यसि किं जटावान्
किं खिद्यसे दुःखफलैर्व्रतैश्च ।
महाबलां मां रमणीमवाप्य
विजित्य शत्रूनुपभुङ्क्ष्व भोगान् ॥ १४ ॥

वैधव्यदुःखानलदह्यमानं
निर्वापयन्नङ्ग मदीयमङ्गम् ।
लभस्व पुण्यं परमं महात्मन्
यच्छर्मदं स्यादुभयत्र लोके ॥ १५ ॥

रदच्छदे राजति रक्तिमा ते
स मे सरागं विदधाति चेतः ॥
परेषु दृष्टेषु हि दृष्टमात्रा
निजान् गुणान् संक्रमयन्ति सन्तः ॥ १६ ॥

एतौ त्वदीयौ विमलौ कपोलौ
स्मितप्रभालंकृतपार्श्वभागौ ।
तवाधरं चुम्बितुमुद्यतायाः
कदा नु मे दर्पणतां व्रजेताम् ॥ १७ ॥

एवं वादिन्या एव शूर्पणखाया वचनमाक्षिप्य श्रीमान् दाशरथिः स्मितपूर्वमभाषत। भद्रे। इयं मे भार्या दयिता वनेऽपि मामनुगता न मया परित्यक्तुं युज्यते । न च त्वादृशीनां सपत्नीभावः सुखाय भवेत् । ममानुजस्तु लक्ष्मणः शीलवान् वीर्यवान् रूपयौवनसंपन्नोऽसंनिहितदारत्वाद्भार्ययार्थी सर्वथा तेऽनुरूपः पतिर्भवितुमर्हति । तन्मेस्मर्कप्रभेव त्वमेनं भज ।

इत्यभिहिता सा निशाचरी सहसैव रामं संविहाय नातिदूरे स्थितं लक्ष्मणमुपेत्य 'मया सह सुखं विहरतु भवान्' इति सनिर्बन्धमवादीत् । लक्ष्मणस्तु परिहासकाम्यया सस्मितमुवाच । अयि सुमध्यमे । आर्येण परवानहमनेन मेऽग्रजन्मना । कथं नु खलु दासस्य मे भार्या भूत्वा दासीपदं वाञ्छसि । ननु स्वामिनोऽस्य मे ज्यायसो

भ्रातुर्यवीयसी भार्या भूत्वा स्वामिनीव मामाज्ञां कारय । एषोऽपीमां भार्यां परित्यज्य त्वामेवाश्रयिष्यति । को हि नाम विचक्षण एवंविधं रूपं विहाय मानुषीषु भावं कुर्यात् । तन्निवर्तस्व । निर्बन्धं चास्य कुरुष्वेति ।

शूर्पणखापि परिहासविजल्पितमिदं परमार्थेन गृहीत्वा स्मरानिललोला दोलेव गतागतं कुर्वाणा राममुपेत्य प्राब्रवीत् ।

स्वयं भजन्तीं मदनेन पीडितां
परित्यजन्मामनुजो जडस्तव ।
शरीरसंस्पर्शसुखां हि शारदीं
निवारयेत् को नु पटेन कौमुदीम् ॥ १ ॥

न तेऽनुजोऽयं न च कश्चिदन्य-
स्त्वमेव भर्ता रसिको मतो मे ।
रम्यापि योषा कवितेव नालं
हर्तुं मनो मन्दधियः कदाचित् ॥ २ ॥

इति ब्रुवाणां शूर्पणखां श्रीमान् दाशरथिर्मन्दस्मितालंकृतवदनः पुनरवोचत् । भद्रे । नूनं मन्दधीर्मेऽनुजो यो भवतीमुपागतामेवमुपेक्षते। मद्वचनात् पुनरपि त्वयायं वाच्यो यथा मेमामनाथां विजहाहीति । इमां मे गिरमाकर्ण्य नूनमयं ते मनोरथं पूरयिष्यति ।

इत्यभिहिता सा पुनर्लक्ष्मणमुपेत्य रामाज्ञामस्मै विनिवेदयामास । सोऽपि रामस्य विदिताभिप्रायः साधिक्षेपमुवाच ।

राक्षसी त्वमसि दुष्टचारिणी
पुंश्चली भ्रमसि नष्टभर्तृका ।
सर्वथा भवसि निग्रहोचिता
संग्रहेण तव किं करोम्यहम् ॥ १ ॥

सुदुःश्रवमिदं लक्ष्मणोदीरितं वचनमाकर्ण्य शूर्पणखा क्रुधा ज्वलन्ती नैसर्गिकमात्मनो रूपमाविष्कृत्य जिघत्सया व्यात्तवदना तदग्रतोऽवास्थित । प्रोवाच च भक्षयाम्यद्य वः सर्वानिति ।

सा सीतां मृगशावाक्षीमलातसदृशेक्षणा ।
अभ्यगच्छत्सुसंक्रुद्धा महोल्का रोहिणीमिव ॥ १ ॥

[वा. रा. अर. १८-१७]

काली करालवदना सा सीतां हन्तुमुद्यता ।
बभूवेन्दुकलालुब्धराहुच्छायानुकारिणी ॥ २ ॥

[रा. मं. ५३७]

तामाकृष्य रुषा रामः क्षणं लक्ष्मणमब्रवीत् ।
दुरन्तः परिहासोऽयं न हिंस्राः केलिभाजनम् ॥ ३ ॥

[रा. मं. ५३८]

आशीविषैः परिष्वङ्गः पिशुनैर्गुह्यमन्त्रणम् ।
अवश्यं भयमाधत्ते परिहासश्च दुर्जनैः ॥ ॥ ४ ॥

[रा. मं. ५३९]

वज्राशनिर्विनिष्पेषनिर्घोषविषमस्वनैः ।
पश्यास्यास्तर्जनैरेव मैथिली मोहमागता ॥ ५ ॥

[रा. मं. ५४०]

इत्युक्तो रघुनाथेन लक्ष्मणोऽपि भयाकुलः ।
चिच्छेद करवालेन राक्षस्याः कर्णनासिकम् ॥ ६ ॥

[रा. मं. ९४१]

सीतामाहर्तुकामामसुलभविषयप्रार्थनोद्दामकामां
सौमित्रिः शस्त्रपाणिर्दशमुखभगिनीं तामनार्यां निवार्य ।
कामक्रोधात्मकानामहमहमिकया प्रेङ्खतामायतानां
तस्याः श्वासानिलानामकुरुत तरसा मार्गविस्तारकृत्यम् ॥७

[चम्पूरा. अर.]

विद्याव्यसनिनो वचनम्

गताः शरीरेण परेतभावं
कृतेर्महिम्ना त्वमरीकृता ये ।
विद्वद्वरैस्तैः परिवेष्टितस्य
क्षणोपमा मे दिवसाः प्रयान्ति ॥ १ ॥

यदा यदाहं परितः क्षिपामि
कुतूहलाल्लोचनयुग्ममेतत् ।
पुरातना बुद्धिमतां वरेण्या
नरः पुरस्तात् प्रकटीभवन्ति ॥ २ ॥

ते सत्त्वशीलाः सुहृदो मदीया
दिने दिने तैः सह संलपामि ।
तत्संगतः संपादि यामि हर्षं
विपत्सु दुःखं शिथिलीकरोमि ॥ ३ ॥

यद्भास्वतो ज्ञानरवेर्मयूखाः
सुखं मदीये प्रविशन्ति चित्ते ।
मूर्च्छन्ति यद्वात्र विकारिभावा
ननु प्रभावः सुहृदां स एषाम् ॥ ४ ॥

एकाग्रचेताः सुविचारपूर्णान्
रहो येदमान् परिशीलयामि ।
उदश्रुनेत्रस्य ममार्द्रभावात्
कृतज्ञतां दर्शयतः कपोलौ ॥ ५ ॥

अमी विदेहा अपि मानसं मे
सकृत् प्रविष्टा न परित्यजन्ति ।
अतीतपूर्वाण्यतिवाहयामि
वर्षाण्यमीभिः सह भूय एव ॥ ६ ॥

मनो मदीयं रमते गुणेषु
दोषेषु तेषां भजते विरागम् ।
यत्स्वानुभूत्या समुदीरितं तै-
स्तदेव मन्ये वचनं प्रमाणम् ॥ ७ ॥

तैरेव सार्धं सततं वसेयं
पदं तदध्यासितमाश्रयेयम् ।
संसारयात्रां च समाप्य शेषां
यशोविशेषं भुवि शेषयेयम् ॥ ८ ॥

अयं महान्मे मनसोऽभिलाष-
स्तमेनमीशः सफलीकरोतु ।
देहेन नष्टा न हि नाशवन्तः
कर्मावदातं भुवि कुर्वते ये ॥ ९ ॥

' रिचर्ड् बेरी ' इति सुगृहीतनाम्ना केनाचिद् विपश्चिता ग्रन्थान् प्रशंसता भणितम् ।

सद्ग्रन्थाः किल गुरवोऽस्माकम् । न पुनरमी शिक्षयन्तो यष्टि-प्रयोगं कुर्वन्ति । न परुषां वाचमुद्गिरन्ति । न क्रोधस्य वशं यान्ति । न चास्मत्तो गुरुदक्षिणां जिघृक्षन्ति । यदा कदाप्यमूनुपतिष्ठन्तु विद्यार्थिनः । न जात्वपि शयाना अमी दृश्यन्ते । प्रत्युत शिष्यानुजिघृक्षया सदैव जागरूका एवावतिष्ठन्ते । तत्त्वान्वेषणे संशयानाः किमपि

चेदेताननुयुङ्ग्ध्वे तदा युष्मत्सकाशान्न किंचिदपि निह्नोतुमभिलष्यन्त्यमी। तद्वचसामगृहीतार्थाश्चेद्भवथ तदा पुनरप्यखिन्नमनस एव विवृण्वते निजमाशयम्। अज्ञानोपहता अपि नैतेषां कदाप्युपहास्यतां गच्छथ। तस्माद्विद्याधनेन परिपूर्णो ग्रन्थसंग्रह एव भूतलगतसकलद्रविणकोषापेक्षया सुतरां महार्घ इति नास्ति कश्चित् संदेहः। न चेह किमप्यन्यदभीप्सितं मानवानां यद् ग्रन्थसंचयेन तुलामधिरोढुमलम्। अतो यैः सत्यं च सुखं च ज्ञानं च धर्मश्चाप्युपलिप्स्यते तैरवश्यमेव सद्ग्रन्थानां संचये च परिशीलने च सततमेवाभिरतैर्भवितव्यम्।

'पेट्रार्क' संज्ञकः कोऽपि विख्यातः पण्डितो ग्रन्थानां सौहार्दमेवं प्रशंसति।

सन्ति मे सुहृदो येषां समागमो भूयस एव मे सुखाय जायते। तेषु तेषु कालेषु समुद्भूता इमे तांस्तान् विषयानधिवसन्ति। राजमन्त्रिषु च सैनिकेषु च पौरेषु च ग्रामीणेषु च सर्वत्रापि परां प्रथामेते समुपागमन्। सुमहती किलैषां संमानना तत्तच्छास्त्रावबोधजनिता। एवं गतेऽप्यनायासोपसर्पणीया एते सततं मत्कार्येष्वभिरताश्च। यथारुचि सङ्गममीभिरनुव्रजामि विसर्जयामि वैतान् पुनरागमनाय। न कदाप्येते मामुपरुन्धन्ति। मदनुयुक्तानां च प्रश्नानामुत्तराणि सद्य एव ददति। केचिन्मे पुरातनकथाः कथयन्ति। केचित् सृष्टिसुन्दर्या रहस्येषु मामभ्यन्तरीकुर्वन्ति। केचित् कथं मया जीवितव्यमिति मामनुशासति। केचिच्छिष्टाभिमतं मे मृत्योः पन्थानं दिशन्ति। केचिद् हर्षुलतया मनसो मे विनोदाय कल्पन्ते दूरीकुर्वन्ति च मे चिन्ताशतानि स्वकीयैरुत्साहवचनैः। केचिन्मामवष्टम्भयन्ति शिक्षयन्ति च गुर्विदमाचाररहस्यं यन्मानवेन यतात्मना सर्वथा सत्त्वसंपन्नतया सर्वेष्वप्यर्थेषु

स्वावलम्बिनैव भवितव्यमिति । किं बहुना । तासु तासु कलासु तेषु तेषु शास्त्रेषु च यथा मे प्रवेशः सुखकरः स्यात्तथा तत्तदधिगमोपायान् सुलभानेव मेऽमी विदधते । तद्दर्शितमेव चेत्पन्थानं विश्रब्धमनुसरामि तदा तानि तानि व्यसनानि सुखेनैव संतरामि । य इमे मय्येतेषामुपकारास्तेषां निर्यातनमिति नामी मत्तः किमपि समपेक्षन्ते केवलं तु मद्भवनकोणे क्वचिदपि किंचित् स्थलमुपलिप्सन्ते विश्रान्तिसुखमनुभावितुम् । एतेषां हि न तथा रुचिरुपजायते जनाकीर्णेषु प्रदेशेषु यथा प्रशान्तेषु विविक्तेषु ।

अत्र विषये कस्याप्याङ्ग्लवरेण्यस्य 'मेकॉले' महाशयस्य वचनमिदं सम्यगालोचनीयम् ।

सुमहान् खल्वादरः सुविनीतात्मनः पुरुषस्य पुरातनेषु महाशयेषु ग्रन्थकृत्सु । अयमपरिमेयमृणममीभ्यो धारयति । तथा हि दर्शयन्त्येनमसकृदमी पन्थानं सत्यस्य । परिपोषयन्ति चास्य मानसं परमोदाररमणीयैः कल्पनाविशेषैः । शोकाकुलमेनं समाश्वासयन्ति । रोगग्रस्तं समुपचरन्ति । विजनगतस्य च साहचर्यं विदधते । एवं तेषु तेषु दशान्तरेषु स्निग्धतमाः सुहृद इव समीपगा एवास्य भवन्ति । नैतेषां सौहृदानि कदापि भवन्ति भाजनं तेषां व्यतिकराणां यैः किल संश्लेषणान्तराणि कालवशाच्छिथिलीभवन्ति विलयं वाप्युपयान्ति । अनावर्ती कालः । चञ्चलाः श्रियः । विकारिण्यो वृत्तयः । दुरुच्छेदानीति प्रतीतपूर्वाणि बन्धनानि शनैः शनैः शैथिल्यमापद्यन्ते स्वार्थपरतया वा विजिगीषुतया वा स्वच्छन्दानुवर्तितया वा मनुजन्मनाम् । न पुनरेवंविधं किमपि कारणं विकृतिं जनयितुमलमस्माकं सम्बन्धेऽस्मिन् पुराणसुहृद्भिरमीभिः । यन्निःशब्दमेव संलपामः पटुतरमतिभिर्भतपूर्वैर्ग्रन्थकृद्भिस्तत् सततमविकार्यमेवावतिष्ठते । निराकुलोऽयमस्माकं समागमः । नात्र प्रभवति मत्सरः । न वा मूर्छति संरम्भः ।

चिरंतना अमी सुहृदोऽस्माकम् । न ह्यमीषां मुखविकारो नवनवः कदापि समुद्भवति । समवृत्तय एवामी संपत्सु च विपत्सु च । न गुणान्वा न दोषान्वा गणयन्त्यमी अस्माकम् । परेतत्वान्नैते मात्सर्यभाजः । न वा विकारवशाः । न कोऽप्यमीषामुदासीनतयास्मासु वर्तते । न कोऽपि धाष्टर्येन व्यवहरति । न कोऽप्यनवसरोपसर्पी भवति । न कोऽपि सुचिरमवस्थाय कार्यान्तरान्तरायं जनयति । न मतभेदो न स्थितिभेदो न वान्यत् किमपि कारणं प्रभवति सुश्लिष्टमिममस्माकं सन्धिं विघटायितुम् ।



जीवितं प्रति

जीवितमिति यदिहास्युदितं
तत्त्वं किमिति न मे विदितम् ॥ १ ॥

मतिरियमेव तु विनिश्चिता
त्वया वियोगो मे भविता ॥ २ ॥

कदा कथं वा क्व चावयोः
संगो घटितः संगतयोः ॥ ३ ॥

इत्यद्भुतमिव मे भाति
नात्र हि तर्कः प्रसीदति ॥ ४ ॥

संपदि विपदि च सहोषितं
चिरमावाभ्यां यदविरतम् ॥ ५ ॥

तन्नौ सुहृदोः सुदुःसहो
भवेद्वियोगः कियानहो ॥ ६ ॥

त्वद्विरहः श्वासं जनयेत्
नेत्रतोऽस्रमपि निपातयेत् ॥ ७ ॥

तद्भो जीविन निभृतपदं
याहि विहाय शरीरमिदम् ॥ ८ ॥

प्राङ् मा सूचय निजां गतिं
स्वैरं गन्तुं कुरु च मतिम् ॥ ९ ॥

१३

स्वायत्तमारोग्यं मानवानाम्

न हि न भवन्ति हिताय नो भिषजां भेषजानि। न पुनरस्मच्छरीरस्यानामयत्वं तथा भिषगायत्तं भवति यथा स्वाधीनम्। न हि न कस्याप्यनभिमतं शरीरस्वास्थ्यम्। सर्वेऽपि खल्वेतदेव बहु मन्यन्ते वस्त्वन्तरापेक्षया। न पुनर्बहवोऽत्र विद्यन्ते मनुजा ये तत्साधनाय यथावत् प्रयतन्ते विनिवर्तन्ते वा यावच्छक्यं मिथ्याहारविहाराभ्यां निखिलगदनिदानभूताभ्याम्। प्रत्युत भूयांस एवात्रोपलभ्यन्ते मानवा ये जानन्तोऽपि तथा चरन्ति चरितानि यथा तैस्तैरामयैरभिभूयमाना अकाल एव जरामाप्नुवन्ति मृत्योश्च वशमुपयान्ति। सर्वथा सुशक्यैव नीरोगतास्माकं यदि केवलं बलीयांस्तत्र नोऽभिनिवेशः। यद्रोगाः पदं कुर्वतेऽस्मच्छरीरेषु तत्र प्रायेण वयमेव दोषभाजः। विहितस्याननुष्ठानान्निषिद्धस्य च सेवनाद्यद्रोगैराकुलीक्रियामहे तत् किमाश्चर्यकरम्। स्पृहयामः खलु कस्मैचिदद्भुताय सामर्थ्याय येनाखण्डमारोग्यमस्माकं भवेत्। न पुनः स्वायत्तानुपायान् समवलम्बामहे। यथा किल स्वाधीनमानयनं रोगाणां यदा कदापि भवति तथैव तेषां परिहरणमपि स्वायत्तमेवेति सम्यङ् न जानीमहे जनाना अपि वा मूढा इव वात्मघातिन इव वा न श्रेयांसं पन्थानमुररीकुर्महे। यत्सत्यं प्रायेण रोगजाः सर्वा अपि नो देहयातना आत्मन एव क्रियायाः फलम्।

नित्यं हिताहारविहारसेवी
समीक्ष्यकारी व्यसनेष्वसक्तः ।
दाता समः सत्यपरः क्षमवा-
नाप्तोपसेवी च भवत्यरोगः ॥ १ ॥

[अष्टाङ्गहृदये]

मार्जनी

कुरु मार्जनि निजजनिमिह सफलां
सततं प्रकटय कृतिमतिविमलाम् ॥ १ ॥

विरजीकुरुषे भवनं सकलं
बहिरङ्गणगतमपहरसि मलम् ॥ २ ॥

यत्तु रजो मनुजनुषां चेतसि
दूरीकर्तुं तन्न प्रभवसि ॥ ३ ॥

अत एव त्वामशुभदर्शनां
रजोवृतामामनन्ति मलिनाम् ॥ ४ ॥

तिष्ठसि कोणे क्वचिदपि भवने
या त्वमलं तन्मलसंहरणे ॥ ५ ॥

अहह कर्मणो गतिरतिगहना
यदीदृशी तव मानखण्डना ॥ ६ ॥

मार्जय मार्जय रजसां निकरं
संचर भुवि चर चरितमघहरम् ॥ ७ ॥

तन्वत्याः क्षितिघर्षणमविरति
तनुरतनुं तनुतां तव याति ॥ ८ ॥

दासीव त्वं यान् परिचरसि
तेभ्यो गलबन्धनमनुभवसि ॥ ९ ॥

केयं कृतघ्नता मनुजानां
दास्यविमोचधृतव्रतानाम् ॥ १० ॥

उक्त्यनुरूपा कृतिर्न येषां
किंलाभं परिचरणं तेषाम् ॥ ११ ॥

अमलमासनं शयनं वसनं
किंफलमिह यदि मनोऽस्ति मलिनम् ॥ १२ ॥

तद्भो मार्जनि मनसोऽपि मलं
मार्जयितुं कुरु यत्नं विपुलम् ॥ १३ ॥

मार्जय मार्जय रजसां निकरं
संचर भुवि चर चरितमघहरम् ॥ १४ ॥

APPENDIX

Containing

My Original Marathi Compositions

and

The Passages in Prose and Poetry

of

English authors,

forming

The basis of many of the

foregoing pieces

Page 1

वरयाचना

शंकरास उद्देशून

धवलवर्ण हिमाद्रि निकेतन
   धवलवर्ण तुझें वृष वाहन ।
धवल भस्मविलिप्त तनू असे
   धवल गांगजलें शिरही दिसे ॥ १ ॥

धवलवर्ण सुधांशुकला वरी
   वसति पिंगलवर्णजटान्तरीं ।
त्वदधरीं विलसे स्मित पांडुर
   सद्दशसंघटना सुमनोहर ॥ २ ॥

धवलता तुझिया जवळीं किती
   मम मनांत कृतींतहि ओत ती ।
धवल कीर्ति विभो मिळवावया
   क्षम करीं निजदासजनास या ॥ ३ ॥

त्रितापशमनार्थ जो धरिसि तूं त्रिशूला करीं
   तमा त्रिजगताचिया त्रिनयनींच नेसी दुरीं ।
शिरीं त्रिमलहारिणी त्रिपथगा वसे ज्याचिया
   त्रिवर्गफलसाधनीं क्षम करीं स्वदासासि या ॥ ४ ॥

Pages 2—3

चूल

पद्य.

चाल:–(भूपाळीची)

चुली माउली तव गुण गातां न पुरे ही वाणी ।
परी यथामति कवनीं कवि हा तुजला वाखाणी ॥ ध्रु० ॥

जन्मलीस तूं मातीपोटीं परि तव कृति मोठी ।
जन्माधीना जगीं प्रतिष्ठा ही उक्ती खोटी ॥ १ ॥

प्रात:काळीं उठोनि नारी तव चरणां धरिती ।
निजकरकमलें सादर तव तनुसंमार्जन करिती ॥ २ ॥

प्रेम तुजवरी सकलांचें अति तुजला बहु जपती ।
निजभवनींचें निखिलसुमंगल धाम तुला गणिती ॥ ३ ॥

अपार महिमा तव स्थापना घरोघरीं करुनी ।
मदनदेवता कल्पुनि तुज जणु सेविति दिनरजनी ॥ ४ ॥

॥ चुली माउली इ० ॥

बहुविध काष्ठें स्वत: भक्षुनी आत्मपुष्टि करिसी ।
षड्रस अन्नें तयार करुनी तुष्टि जनां देसी ॥ १ ॥

स्वकीय उदरा प्रखरपावकें दग्ध करुनि घेसी ।
परजठराग्नी स्वकृतरसानें संतत शमवीसी ॥ २ ॥

निजतनु झिजवुनि रिझविसि इतरां अनंतगुणराशी ।
खडतर तप हें आचरितां फळ योग्य मिळे तुजसी ॥ ३ ॥

कालें करुनी देह तुझा जैं जाई भंगोनी ।
पुनर्जन्म ये तुज न जासि तूं निजरूपीं मिळुनी ॥ ४ ॥

॥ चुली माउली इ० ॥

चूलखंड गृहिं मांडी त्याला त्रिखंडही न पुरे ।
वृद्धज्ञानी सांगत आले अनुभवशब्द खरे ॥ १ ॥

तुजविण नाहीं जगिं या कांहीं तूंचि महामाया ।
संसाराचें मूळ वाटतें असे तुझी काया ॥ २ ॥

तुझ्यामुळें जन सकळ गुंतले या संसृतिजाळीं ।
स्वतत्त्व दाउनि जननि तयांचें जनन मरण टाळीं ॥ ३ ॥

हेंचि मागतों स्वकर जोडुनी नत होउनि चरणीं ।
आस एवढी पुरवीं माझी कृपादृष्टि करुनी ॥ ४ ॥

॥ चुली माउली इ० ॥

Pages 4—।

शुकबालकसंवाद

बाळक—

येइं पोपटा येइं झणी
राहुं नको या विजनवनीं ॥ १ ॥

चल मजसंगें गृहाप्रती
योग्य न येथें तुज वसती ॥ २ ॥

झडकरि उतरीं तरुवरुनी
पहुड मजेनें सुखशयनीं ॥ ३ ॥

सोडुनि दे त्या ही फांदी
सुवर्णपंजरिं वस आधीं ॥ ४ ॥

गुच्छ फुलांचा नव ताजा
देइन रोज तुझ्या काजा ॥ ५ ॥

भूक हराया गोड अशीं
पक्क फळें देइन खाशीं ॥ ६ ॥

शुक—

कां मुला खिन्न मनिं होशि ऐसा वृथा
कां अशी काळजी तुजसि माझी ।
शिणविशी आपुली व्यर्थ वाणी गड्या
बोलणें ऐकण्या मी न राजी ॥ १ ॥

जा कसा आलिया नीट वाटे त्वरें
तुजचि होवो तुझें सुखद घर तें ।
तृणमयहि हें मना तोष घरटेंचि दे
याहुनी न च मला सुखद पर तें ॥ २ ॥

कन्द फल मूल जल विपुल आहे वनीं
क्षुत्तृषाप्रशमनीं क्षम न कां तें ।
तव पुरा मन्दिरा पंजरा तुजसिही
कोणरे मग मुला येथ पुसतें ॥ ३ ॥

बालक—

मेघ वर्षितिल जलधारा
वाहिल घोर नभीं वारा ॥
थड थड पडतिल जैं गारा
मिळेल कोठें तुज थारा ॥ २ ॥

झाडें घरटीं सुखद तुला
होतिल कां मग सांग मला ॥ ३ ॥

मजसंगें बा ये म्हणुनी
व्यर्थ दुराग्रह हा त्यजुनी ॥ ४ ॥

ठेव भरंवसा मजवरतीं
बाळगीं न बा भय चित्तीं ॥ ५ ॥

प्रेमें मजसी वाग सदा
सर्वहि विलया ने विपदा ॥ ६ ॥

शुक—

विविधऋतुसंपदा हर्षवी मन्मना
वर्षवातादिकीं तोष होई ।
ज्या दुज्या अडचणी येति त्यांपासुनी
ताप बहुधा मला होत नाहीं ॥ १ ॥

विजनही वन मनीं भीतितें नुपजवी
प्रीत मानस बहू होय येथें
व्यसन जर ओढवे विधिवशें मजवरी
अन्य वरितों स्थळा क्षेम जेथें ॥ २ ॥

स्वैर संचार बा फार रुचला मना
करुनि अविचार तुज अनुसरूं कां ।
बंधना मरणसें मानिती जगुनिही
ठाउकें पटुमते तुज न हें कां ॥ ३ ॥

बालक—

अन्य वना प्रति जायाला
दाविल कोण सुमार्ग तुला ॥ १ ॥

मोठे मोठे शैल कसे
दुस्तर सागर तेहि तसे ॥ २ ॥

जाशिल उलंघुनि वेगें
बा मूढा हें मज सांगें ॥ ३ ॥

माझ्याशीं मैत्री जोड
हितकर हीच खरी तोड ॥ ४ ॥

स्वीकारुनि मत्साहाय्या
सफल करीं सुंदर काया ॥ ५ ॥

ऐक येवढें वच माझें
कल्पकोट कल्याण तुझें ॥ ६ ॥

शुक—

निर्मिलें मज ज्येंं पोषिलें आदरें
तो हरी सदय मव्द्यसननिकर ।
शैलशिखरें महा वारिधीही तसे
लंघणें होतसे मजासि सुकर ॥ १ ॥

परमकरुणानिधी त्रिभुवनाचा पती
असुनि तारक मला काळजी कां ।
स्वार्थसाधनपटू माणसें तुजपरी
ठेवुं विश्वास मी त्यांवरी कां ॥ २ ॥

गोड जे बोल ते पाश गमती मला
त्यांत पडतां कुणा सौख्य मिळतें ।
परकरीं जें असे सुख न तें सुख खरें
तें मना माझिया मुळिं न रुचतें ॥ ३ ॥

Page 8

The Original Passage runs thus:---

1. Oh ! say what is that thing call'd light
which I must ne'er enjoy.
what are the blessings of the sight.
oh tell your poor blind boy ?

2 You talk of wondrous things you see,
You say the sun shines bright;
I feel him warm, but how can he,
or make it day or night ?

3. My day or night myself I make
Whene'er I sleep or play;
And could I ever keep awake,
with me ' twere always day.

4. With heavy sighs I often hear
You mourn my hapless woe;
But, sure, with patience I can bear
A loss I ne'er can know.

5. Then let not what I can not have
My cheer of mind destroy;
Whilst thus I sing, I am a King,
Although a poor blind boy.

C. Cibber

Page 9

